स्यतेत्याशंक्याह तदिति। प्रकरणांगत्वेन सूक्तवाकोपदेशस्य याज्याशब्दोपपत्तिहेतोस्तथात्वं गत्वे सतीति वार्त्तिकनिर्दिष्टस्य
प्रासंगिकत्वेना समाप्त्या उद्दिष्टीकृतस्य तद्धेतुत्वेन परामर्शात्तेन सूक्तवाकस्य प्रहरणांगत्वोपदेशेनैव हेतुना प्रक्रियमाणस्य
प्रस्तरस्य मान्त्रवर्णिकदेवतात्वयाद्यागत्वं पारमार्थिकमित्यर्थः। प्रहरणस्य सूक्तवाकप्रकाश्यदेवतात्वयाद्यागत्वे सत्यपि हो
मत्वाभावाद्धोमसाधनद्रव्यत्वनिमित्तं प्रस्तरस्याङ्गत्वं नास्तीत्याशंक्याह नचेति। प्रक्षेपाधिक्यविधाने पि जुहोतिचोदनां विना
कथं होमतेत्याशंक्याह आघारादीति। जुहोतिचोदनाभावे पि प्रक्षेपाधिके यागे भियुक्त्या समिद्धे होमतास्त्येवेत्याशयः। वितताः पू
र्णाआयुदीचोर्निनयेहत्वस्यः स्वाहादिभ्यः स्वाहा सप्तऋषिभ्यः स्वाहेतरजनेभ्यः स्वाहेत्यादिविहितस्योदकनिनयनादेर्मान्त्रवर्णि
कदेवतात्वयाद्यागस्य प्रहरणाधिकरणाद्धोमतादिशब्देनोक्ता। एवं च सत्यपि यागांगत्वादपि सूक्तवाकस्य याज्यात्वं नास्तीत्याह होम
ति। सूक्तवाके तु विशेषतो याज्यात्वं नेष्यते निगदत्वेन याज्यात्वनिषेधादित्याह निगदत्वादिति। निगदत्वमेव तावत्कथं सूक्तवा
कस्येत्याशंक्याह। नितरामिति। तथापि याज्यात्वनिषेधः कथमित्याशंक्याह निगदानां चेति। निषेधस्वरूपोऽर्थवादोऽयं लिंगत्वेनो
पन्यासस्तु विधेरेकवाक्यत्वोक्त्या शक्तिविता तस्माद्विशेषतः सूक्तवाकस्य याज्यात्वं नेष्यत इति हिशब्दार्थः। ननु निषिद्धं चेत्कथं तर्हि २२

पूर्वपक्षेपि तर्हि स्तुतित्वेन याज्याव्यपदेशोपपत्तेर्न सिद्धान्तलिंगतेत्याशंक्याह न चेति । पूर्वपक्षे त्वंतनिरालंबनस्तुत्यापत्तेर्नो भयोः पक्षयोः स्तुतियुक्तेत्यर्थः ४

स्पर

सूक्तवाकएवयाज्येत्युक्तमित्याशंक्याह निषिद्धमपीति होमांगत्वे सूक्तवाकस्य याज्यात्वप्रशंसा निरालंबना स्यादि
त्याशंक्याह तत्संबंधादिति । आज्ञतेः परमार्थिकत्वप्रसंगेनोक्तस्य होमांगत्वाद्याज्यात्वनिषेधे समासाद्बुद्धिस्थत्वेनाङ्कृते
सम्बद्धेन परामर्शाद्याज्यावत्सूक्तवाकस्यापि होमकालप्रयोज्यत्वेनाङ्गत्वात् व्याहूयमानावस्थायां संबंधलक्षणेन याज्या
योगाद्याज्यात्वेन स्तुतियुक्तेत्यर्थः । सदेवतार्थसंयोगात् । परार्थत्वादिति सर्वपक्षसूत्रावयवव्याख्या सूक्तवाकस्य देवतासंकी
र्तनार्थत्वादिति साध्येण कृतार्थत्वोक्त्यर्थतया प्रहरणं च शत्यशक्तेरित्यनेन चासामर्थ्योक्त्यर्थतया व्याख्यातं बाढं का इयं परि
पूर्वपक्षेपि तर्हि स्तुतित्वेन याज्याव्यपदेशोपपत्तेर्न सिद्धान्तलिंगतेत्याशंक्याह न चेति । पूर्वपक्षे त्वंतनिरालंबनस्तुत्यापत्तेर्नो भ
योः पक्षयोः स्तुतियुक्तेत्यर्थः । हारार्थत्वेन स्वव्याख्यार्थय उक्तमित्यत्र भाष्ये ण भाष्य देवतासंकीर्तने समासार्थत्वात्कृता
र्थत्वात्प्रहरणांगं सूक्तवाको देवतासंकीर्तन एव च शक्तो न प्रहरण इत्येवं उच्यत इति परिहारस्यार्थं देवतावचनोपि सूक्त
वाकः प्रहरणस्यापि यागत्वेन देवतासंकीर्तनाकांक्षत्वात् प्रहरणाद्यं विना कृतार्थत्वानुपपत्तेः प्रहरणेन संबध्यते ऽपि
तु संबध्यत एव देवतोक्तिः शक्तोपि च प्रहरणे न शक्तोपि तु शक्त एवेत्येवं द्वेधा व्याख्यातं कृतार्थत्वं तावदस्तु तावता सर्वपरि

हारार्थत्वेन

न न

हरति यच्चेति। भेदश्रुतेनान्योन्यानपेक्षत्वोक्तेर्लिंगावगतं देवताकीर्त्तनार्थत्वमनपेक्ष्यैव यदि श्रुत्या सूक्तवाकस्य च प्रहर
णेगताश्रुत्यवगतत्वप्रहरणांगत्वमनपेक्ष्य यदि लिंगेन देवताकीर्त्तनांगता बोध्येत ततः श्रुतिविरोधाल्लिंगबाधापत्ते
र्बाधिते च लिंगे सूक्तवाकस्याशक्यत्वेन श्रुत्या विनियोगायोगादुक्तया युक्त्या हार्येष्टदेवताकीर्त्तनार्थत्वमनपेक्ष्य यदि श्रुत्या
23 सूक्तवाकस्य प्रहरणांगमात्रेण कृतार्थत्वं सूक्तवाकस्यांगीकृत्य कालार्थप्रहरणत्वयोरुपगम्येत किंतु श्रुत्युपग्रहार्थं लिं
गेन प्रहरणांगभूतदेवताकीर्त्तनद्वारा श्रुत्यवगतप्रहरणांगत्वापेक्षणात् सूक्तवाकस्य च प्रहरणोक्तिशक्तिसिद्धेः श्रुत्या लिंगाव
न गदेवताकीर्त्तनांगत्वापेक्षणात् श्रुतिलिंगयोः कालार्थत्वेन विरोधो नास्तीति न विरोधपरिहारायेष्टदेवतोक्तिमात्रेण कृता
र्थतामंगीकृत्यान्यत्र विनियोगानर्हत्वात् कालार्थतास्युपगन्तव्येत्यर्थः। असामर्थ्यं परिहरति यदस्येति। उभयपरिहारोप
पादनार्थत्वेन प्रहरणं हीत्यादिना श्रुत्युक्तं व्याख्यातुमारभते प्रहहीति। देवतामभिदधत्सूक्तवाकः कथं श्रुत्यर्थं प्रहरणाभि
धानं कुर्यादित्याशंक्याह सर्वत्र चेति। प्रहरणसाधनदेवताभिधानात्प्रहरणमभिहितं भविष्यतीत्याशयः। शेषिस्मृतावि २३
यात्वयित्वेन प्रसिद्धस्य मंत्रस्य प्रतिप्रकाशनार्हतया शेषिरूपस्य मंत्रेणाभिधेयत्वात्सूक्तवाकाभिधेयानां च देवतानां प्रहरणा

द्वयाप्रसिद्धेर्नतदभिधानद्वाराप्रहरणागमंसूक्तवाक्यस्यसेत्स्यतीत्याशंक्याहातत्रापीतियद्यपिप्रसिद्धक्रियाद्वयस्य
मंत्राभिधेयत्वावगतिः अथमंत्रवत्तितथापिप्रसिद्धक्रियाद्वयाभिधानसामर्थ्यात्तावन्मंत्रस्यप्रसिद्धक्रियाद्वयपदार्थाभि
धायित्वाप्रतिपन्नौक्तंगत्वान्यथानुपपत्त्यामंत्राभिधेयस्यक्रियाद्वयकल्पनारूपोविपर्ययःपश्चाद्भवतीत्यर्थः।सामान्यन्या
यमुक्त्वाप्रकृतेरूपकद्वारायोजयतितस्मादिति।सूक्तवाकप्रकाश्यानामग्न्यादीनांप्रहरणद्वयेपितत्रदेवतात्वानवधारणात्क
थंप्रहरणस्यागतालाघवकृतोक्तेत्याशंक्याहनवेति।एवमपिसंबंधइत्याद्यग्न्यादिदेवताकथ्येत्यनंतरार्थंसंक्षेपतोद्यावबत्ता
त्वेनवप्रहरणयागमात्ररूपेवतिष्ठतइतिवार्त्तिकस्यलाघवविरोधंपरिहर्तुमाहअतएवेति।पुरोडाशादेःपरोक्षवादेनहवि
ष्ट्वपरोक्षतयानिर्देशादुपपन्नेहविःशब्देनप्रस्तरस्यहविष्ट्वसंकीर्तनादिसूक्तेप्रस्तरस्यतृणत्वेनानदनीयत्वाद्धविष्ट्वायोग्य
तामाशंक्यानदनीयत्वेपिकृष्णलादिवद्धवनाद्धविष्ट्वोपपत्तिस्तवनार्थइत्योक्तिःमांत्रवर्णिकद्वयदेवताद्वयाद्यागतावमा
समानालाघवकृतोक्तापरमार्थतस्तुपक्षेणाधिकाद्धोमतेवावधार्यतइत्येतदेवसूत्रकृत्संमतमित्याहतृतीयेतुहरणेतुजुहोतिर्या
गसामान्यादित्याणोवार्थशेषत्वादितितृतीयाधिकरणस्यैकदेशःशास्त्राप्रहरणस्यार्थकर्मत्वसिद्धौहोमत्वेप्युपपत्त्यामा

र्या

न्कस्य

ऐ सहशाखया प्रस्तरं प्रहरतीति सहशाखेस्य प्रस्तरस्य सहयोगस्य हेतुत्वाभिधानात् प्रस्तरप्रहरणस्य होमत्वेऽपि सिद्धावसीय

तइतिमत्वापत्तिः। तस्मादित्युपसंहारभाष्यमुपक्रमाविरोधाद्देवतार्थत्वेऽपि हरति संयोगो घटत एवेत्युपसंहार्येऽविपरीतानि

धानादयुक्तमाशंक्याविरोधेऽपि तावल्लैंगिकस्य देवतार्थत्वस्य वाधापत्तेस्तृतीयाश्रुतेः काललक्षणार्थत्वकल्पनानयुक्ताइ

२४ हत्तु विरोधाभावान्न किंचिद्बाध्यमित्येवमर्थत्वस्यवनार्थतामाह तस्मादिति। स्तं वानेनलाघवेण हरति संयोगेऽपि सूक्तवाको

देवतार्थ एव हरतेरपि देवतासंयोगादित्येवं योजितं भवतीत्याह। एवंचेति। कालार्थतापि श्रुत्यायावगतानवाध्येत्याह काला

र्थतापिचेति। अनुयाजयाज्यानंतरं सूक्तवाकपाठात् सूक्तवाकेन प्रस्तरकालः शक्यो लक्षयितुमित्याशयः। यदीत्यादि

भाष्यमाशङ्क्येयमित्याद्यश्रवणेऽपि श्रुत्यवगतप्रस्तरप्रहरणं गत्वान्यथानुपपत्त्याख्यादीनां प्रहरणत्वयावगमादयुक्तमा

शंक्य व्याचष्टे यदीति। नचेति। लाघवेणानेन हविषेत्यनेनापि प्रसिद्धहविष्ट्वश्रुतेरोजाशादेरेवापरोक्षत्वोपचारान्निर्देशोप

पत्तेः सूक्तेनाग्न्यादेः प्रहरणत्वकल्पनानयुक्तेत्याशंक्यो भयविधलिंगसत्वात्सन्देहे सति श्रुत्यालोचनयाग्नियोम

विष्यतीनि परिहारार्थत्वेन भयथेति भाष्यं व्याचष्टे यद्यपि चेति। आशाङ्क्येयमित्याद्यश्रवणेऽपीदं हविरित्यपरोक्षनिर्देशाद्धविः २४

शाब्दस्य प्रसरविषयत्वावगतेरर्थ्यादीनामनंतरितत्वोक्तिमात्रे पर्यवसानं न संभवतीत्यभिधानार्थमर्थवेति साध्यं व्याच
ष्टे अर्थवेति। आग्नेयपुरोडाशस्य चतुर्द्धाकरणेन नाशाब्दविरंतरणं वसंगुवाककालत्वात्तार्थशेषमज्ञात्वेपि सामर्थ्यरूपनाश्रा
दर्पत्यन्नत्ता। प्रसरस्यापोह्यमानत्वेनानुपपत्तेत्यतो न निर्देशानर्थक्यापत्तेः प्रसरनिर्देशो न युक्त इत्याशंकाना अनुपपत्तेति। स्कृत्यर्थ
त्वान्नस्तनिर्देशोनर्थकमिति परिहरति नेति। अनःप्रहरणांगत्वेपि सूक्तवाकस्य देवतार्थत्वाविघातात्प्रहरणांगतोपपन्नेति सू
वतात्पर्यमाह अत इति। प्रतिपत्तिरिति चेत्। परार्थत्वादिति सूर्वपक्षहेतोः कृतार्थत्वोक्त्यर्थत्वेहयोः कृतार्थताविनांगगीत्वानि
रासायोगात्प्रसरस्यापि कृतार्थत्वोक्त्यावगतेः प्रहरणस्य प्रतिपत्तितायाः सर्वोक्तत्वादुत्तरपक्षसूत्रमेतदसामर्थ्यात्कार्थत्वेतु
सूक्तवाकमात्रस्य पारार्थ्योक्तेः प्रहरणस्य प्रतिपत्तितायाः सर्वोक्तत्वादुत्तरपक्षं सूत्रं प्रागुक्तत्वात्परिचोदनासूत्रमित्या
ह अत भावपणमिति। प्रतिपत्तित्वोक्तेः सिद्धान्तात्वेपोपयोगिनामाह कथमिति॥ ॥ स्विष्टकृदुभयसंस्काराद्यादिति सूत्रं परिहा
रार्थत्वेनावतारयति अत इति। साध्यकृतैकस्वतयाद्याख्यातत्वात्सूत्रभेदेन व्याख्यानयुक्तेत्याशंक्य साध्यकृत्साकियया सूत्रद्व
यमेवैतदित्याह आवाय्येति। यथा स्विष्टकृद्यागः प्रतिपत्तिरूपः संस्कारोपि सन्यागः प्रतिपत्तिश्चेत्युभयात्मक इत्याश्रयिष्वविशेष

ह्वत्रैवेतत्तगप्यसामर्थ्यात्स्वर्थेतु सूक्तवाकमात्रस्य पारार्थ्योक्तेः प्रहरणस्य प्रतिपत्तितायाः [illegible]

एभावोर्थःप्रतीयेतेतिवक्ष्यर्थाधिकरणेवक्ष्यतेतथाप्रहरणमप्युत्पत्त्यात्मकमितियथाभाष्यंतावत्त्वंध्यात्वेषयथैवेति।अथ
मपिहरतीत्यर्थः।देवतानामंगत्वसिद्धेर्यागत्वस्यप्रतिपत्तित्वेविरोधोन्यथैतांहृतस्यत्यागस्यकावाकागत्वाविरोधोन्य
र्थतामपिवक्तुंयथाचेत्युक्तं।यागत्वाविरोधंतावदुपपादयतिनहीति।उत्पत्तौयेनसंयुक्तंतदर्थंतदुक्तिहेतुत्वात्तस्यार्थांत
रगमनेशेषत्वात्प्रतिपत्तिःस्यादितिवाअर्थस्तुवक्ष्यमाणलक्षणस्योत्पत्तौक्रियासादनसंयोगात्यक्षरस्यतादर्थ्यावगतेः
प्रहरणस्यार्थांतरगमनात्प्रहरणेसद्भावेनप्रतिपत्तित्वंसंभवतीत्युक्तेप्रतिपत्तेस्वार्हिदृष्टार्थत्वेनवैदिकोगानपेक्षतया
मंत्रानन्वयात्तत्वमपूर्वदेवतानन्वयाद्यागत्वविरुद्धेतेत्याशंक्याउच्छेयत्वावगमोत्तरकालंसाधनतायाःकैमर्थ्याकांक्षा
यांप्रतिपत्त्यर्थकर्मत्वविचारात्सकलकारकवैशिष्ट्यादप्रागवस्थानानर्हत्वान्मंत्राणामन्वयलक्ष्यदेवतान्वयेनप्रहरतेर्या
गत्वेसतिपश्चात्पाधिकाद्धोमरूपताबाध्यतेविरोधाभावविधारणोत्तरकालमनुच्छेयत्वावगमेसतिकैमर्थ्याकांक्षायांप्रति
पत्तित्वावधारणाद्विरोधोभिहितः।नत्वपश्चात्तनेनप्रतिपत्तित्वेनपूर्वावगताहोमरूपताबाध्यतेविरोधाभावादित्याहनत्वे
ति।उभयरूपत्वात्सोसंस्कारस्येतिकर्मधारयत्वेनोभयसंस्कारशब्दंव्याख्यातुमाहतनेति।यागमात्रेपिदेवतान्वयोपपत्ते।

र्होमोयागत्वेनोक्तः। यथाश्विष्टकृदेकसंस्कारोपियागस्तथाप्रहरणमप्युभयोरैन्द्र्यदेवतयोस्संस्कारोपियागत्वं न विरुण
द्धीतिषष्ठीसमासत्वेनव्यव्याचष्टे अथवेति। यथाश्विष्टकृदैन्द्र्यदेवतयोस्संस्कारोपियागत्वं न विरुद्धमयोः संस्कारस्तथा
प्रहरणमपीतिसर्वथासाम्येनान्यथाव्याचष्टे। अथवाश्विष्टकृत्यपीति। केवलप्रतिपत्तिर्वा स्फ्यगमेपि न मंत्रस्य यागत्वं वि
रुध्यत इत्याह नवेति। वैदिकस्यांगस्यदृष्टमात्रेपर्यवसानाभावेनादृष्टार्थत्वाददृष्टार्थयोःप्रतिपत्त्यानाकांक्षासंभवतीत्या
शंक्यप्रतिपत्तेरपिनियमादृष्टार्थत्वाददृष्टार्थत्वांगाकांक्षाप्रीत्याह नियमेति॥ ॥कालोपदेशाऽस्य यत्र सर्ववचनं प्रहरणांग
त्वेपिसूक्तवाकस्येष्टदेवताभिधानार्थत्वाद्विधानात्कृतिविनियोजस्यापिमुख्यएवार्थे विनियोगाद्वचनाद्व यथार्थमित्यस्याप
वादेशत्वाधिकरणेनकृतेपौर्णमास्याममावास्यायांदेवतावाचिनामिन्द्रादिपदानामवामोच्चायां वपौर्णमासीदेवतावाचि
नांप्राजापत्यादिपदानामसमवेतार्थत्वान्मुख्यार्थेविनियोगोनसंभवतीत्याद्विधासमवेतार्थानामप्रयोगादपवादसम
र्थनायेदमधिकरणमित्यनंतरसंगतिप्रकरणसंगतिस्सूचयितुमाह अधिकारस्युपजीवन्निति। नवेति। संदेहभाष्यं व्या
चष्टे किमिति। सर्वपदस्यव्याख्यार्थं तद्यथ तइत्यादिभाष्यं व्याचष्टे किमिति। इन्द्राग्नी वा पृथिवी तद्गमक्षदित्यादौ नमोदेवे

26

माइत्यं तेपदसमूहे सूक्तवाकशब्दस्याध्येतस्य प्रसिद्धेर्निष्कर्षे सूक्तवाकशब्दो निर्वाध्येतेत्याशयः॥ ॥यथार्थं वा शेषभूतसंस्कारा
त्॥ ॥यथार्थं वचनमिति पूर्वसूत्रस्य सावचनशब्दस्य प्रयोक्तव्यशब्देन समासानिष्कृष्या उपगोक्त्या सिद्धं तप्रतिज्ञार्थसूत्र
त्रावयववत्याख्यार्थयश इति भाष्यं स्पष्टत्वादव्याख्याय गृह्णे वर्थसूत्रावयवव्याख्यार्थं शेषभूतमिति भाष्यं यत्तेय ज्ञांगप्रकाश
नमेव प्रयोजनमिति मंत्राधिकरणभाष्योक्तकर्मसमवेतार्थप्रकाशकवाशयतथा तासमानंतरप्रयोगोपयोगोथ्याह
त्यासमवेतार्थप्रकाशकत्वोपपन्नेरयुक्तमाशंक्य यचेतिवार्थवत्वात्स्यादिति स्कृतशब्दाधिकरणसूत्रे संस्कारत्वाद्योदि
तेन स्यादिति लिंगाधिकरणसूत्रे वस्तुख्यार्थविनियोगसंभवे गौणेर्थे मंत्रविनियोगस्याख्यायवादपकर्षोक्तिमभिप्रेत्यक
र्मशेषभूतनार्थसंस्कारकत्वसंभवे कर्मोपकारित्वान्मंत्रा प्रयोक्तव्याः नानार्थेतूक्तमित्येवं व्याख्याउमाह एवमादीनामिति
प्रकारत्वाविनादिशब्देन स्मृतिहेतुसंस्कारोद्बोधकत्वाख्यासंस्कारकृतोक्ता॥ लिंगादिविनियोज्यानाम समवेतार्थवादप
कर्षेपि सूक्तवाकस्य प्रकृतिविनियोज्यत्वेन स्वार्थस्य कर्मावयकल्यामेवात्सर्वासांदेवतानामुत्सयत्र प्रहरणात्वयोस विष्टुती
त्याशंक्याह यदीति॥ आज्यभागादावविहितानामेवंदेवतानां प्रहरणांगत्वे सर्वासामव्ययाः कल्प्येत आज्यभागादिदेव २६

धंगत्वमनपेक्ष्य

वताप्रत्यभिज्ञानात्सर्वदेवताकल्पनानयुक्तेत्यर्थः। प्रहरणस्यापूर्वदेवतानन्वयेपि प्रहरणेन कृतत्वं यत्सूक्तवाकस्यां
गतयागृहीतत्वात्तदमात्रस्याविनियोगेनयुक्तत्वाशंक्याह। अत इति। अतः सर्वयागांगदेवताप्रत्यभिज्ञानात्सूक्ताद्
सूक्तवाकशब्दस्य तु भाषितवचननिमित्तत्वात्प्रहरणस्यार्थाभिधानकर्मत्वेन सूक्तवाककृतसर्वयागांगभूतदेवताप्र
काशनोपजीवितया सूक्तवाकप्रत्यप्रयोजकत्वावगतेः प्रधानयुक्तदेवतापेक्षत्वेन प्रधानाधीनत्वात्प्रधानानां यथा
दैवतमेव सूक्तवाकप्रयोजकत्वान्नकृत्स्नसूक्तवाकग्रहणमित्यर्थः॥ ॥आज्यभागादयोप्यजांताः यागाः सूक्तवाकप्रयो
जकत्वाद्यागांगकर्मासादनांगभूतप्रस्तरप्रतिपत्त्यर्थप्रहरणं प्रति प्राधान्याद्वाप्रधानत्वेनोक्ताः॥ ॥तस्मादिति सूत्रार्थो
पसंहारभाष्यं यो वृष्टेसंति यत्तस्मादिति॥ ॥वचनादिति चेत्॥ ॥कृत्स्नोपदेशादिति पूर्वपक्षहेतुलक्षणार्थत्वेन सूत्रव्या
ख्यार्थमथेति भाष्यं सूक्तवाकशब्दस्यावयवव्युत्पत्त्या सुभाषितवाचिपदसमूहमात्रवाचित्वाद्दिष्टदेवताप्रकाशनार्थपदस
मूहमात्रे सूक्तवाकस्य कृत्स्नत्वोपपत्तेरयुक्तमाशंक्येदं द्यावापृथिवी इत्यादौ दृष्टेप्यइत्यंते पौर्णमास्यां मावास्या देवताप्रका
शनार्थपदसमूहे सूक्तवाकशब्दप्रसिद्धेः पौर्णमास्याममावास्या देवतानाममावास्यायां च पौर्णमासी देवतानामभाषिते

वेनावयवार्थाभावाद्भूदिताशायत्वेनद्याववेस्सूक्तेति।प्रकरणविभागाडमेप्रतिज्ञाशङ्कः॥ ॥स्तूदिवास्फपगमेनकृत्स्नवृच
नपरिहारार्थंतयासूक्तव्याख्यार्थत्वमेइतिभाष्यंव्याख्यातुमाहद्वौहीति।यथैकादशिनीप्रायणीयोदयनीययोरालभेरन्नि
तिद्वादशाहेप्रायणीयोदयनीयाग्न्येदशमेवव्याख्यायोन्नमाहुः।कालत्वेनधृतानामैकादशिनानांपश्चनांद्वद्वस्कृत्य
तरेतरयुक्तयोःप्रायणीयोदयनीययोःकालकृताववगमेनैकैकस्मसमालम्भायोगात्तत्रप्रायणीयेपंचोदयनीयेषट्त्यो
र्थ्यासन्नत्वादुदयनीयएवैतत्त्ववयवशःप्रायणीयोदयनीयाग्न्योदशमेवव्युत्तेयथावालोकेभैक्षाववर्दिभ्योधनंदेयमि
तिवत्तुर्विदविहेयत्वेनोक्तस्यधनस्यैकैकवेदविदेयत्वर्थस्ववर्थोभागइतिस्वयवयवशोन्वयःप्रसिद्धस्तथासूक्तवाकस्याप्यव
यवशःपौर्णमास्यमावास्याकालीनप्रहरणप्रयोगात्वयोमविष्यति[illegible]भाष्यकृत्तत्पक्षेप्रकरणबाधापत्तेस्तदपेक्षयासौत्र
पक्षस्ययुक्ततांस्वयितुमाहतस्मादिति।कृत्स्नस्यसूक्तवाकस्यदर्श[illegible]मासप्रकरणेनग्रहणाद्यथादेवतंवावयवशःप्र
योगात्सूक्तवाकस्येतिदेवतालिंगदर्शपूर्णमासप्रकरणानामविरोधइत्यर्थः।स्वहृष्णार्थंनैनदितिसाध्यमवतारय
तितदिति।विशेष्यस्यानेकविशेषणवशीकारसामर्थ्यात्साधनानांविशेषणत्वेसतिसापेक्षाणामितिकर्तव्यतावयःस्या 

स्यान्नतु तेषामिति कर्त्तव्यतान्वये विशेषणतास्तीत्याशयः ॥ अथ सर्वमेतदुपपादयितुमुक्त इत्यादि भाष्यं तात्पर्यतो
व्याचष्टे कृत इति । साधनानां फलान्वयसिध्यर्थत्वादितिकर्त्तव्यतान्वयस्य फलान्वये सापेक्षत्वादितिकर्त्तव्यतान्वयेऽपि सा
पेक्षत्वे तैव युक्तेत्याशंक्य वैषम्योक्त्यर्थं फलं प्रतीति भाष्यं व्याचष्टे प्रधानानि हीति । नेतिकर्त्तव्यतां प्रतीत्यस्य संगः ॥
इतिकर्त्तव्यताविधेयत्वोक्तेः साधनानामुद्देश्यत्वोक्तिश्च योजनतामाह इतिकर्त्तव्यतां हि प्रतीति । साधनेतिकर्त्तव्यतयो
र्द्वयोरपि प्राप्त्यानिमित्तकोत्पत्तिविधितः स्वरूपेण प्राप्तत्वादेकान्वयित्वेनेतरस्मिन्विधेये साधनान्वयित्वेनेतिकर्त्तव्यता एव विधे
या इतिकर्त्तव्यतान्वयित्वेन साधनमिति कथं निर्द्धारणेत्याशंक्याह अविधीयमानाया इति । इतिकर्त्तव्यताविधानेऽपि कथं
साधनानामुद्देश्यतेत्याशंक्याह सा वेदितेति । वाक्यभेदापत्ते द्वयोर्विधानायोगाद्द्वयोश्चाविधेयत्वे समत्वादन्योन्यासंब
न्धापत्तेः साधनानामुद्देश्यतावसीयत इत्यर्थः । अतो दर्शपूर्णमासाभ्यामिति द्वन्द्वावगतस्य साहित्यस्याविवक्षितत्वा
द्विकृदादिब्राह्मणतर्पणान्तयेतिकर्त्तव्यतयाग्नेयस्य पक्कुर्थ्या उपांशुयाजस्य पञ्चम्यादित्येवमादि प्रत्येकमितिकर्त्तव्यता
वाक्यसमासेः प्रत्येकं समस्तेतिकर्त्तव्यतान्वयावगमान्नान्वयवशो द्वयोरुक्तक इत्याह तत इति । प्रत्येकमेव तत्तदंगावष्टा

२८

नापत्तेः पौर्णमास्याममावास्यायां चैकादशोद्वक्ष्यमाणं तं तेनांगानुष्ठानं विरुध्येतेत्याशंक्याह तथैव चेति। सामान्य
न्यायमुक्तमप्रकृतेयोजयति तदिति। पंचम्यर्थे तदित्यव्ययं। सौत्रपत्नेर्निष्ठापतिमाह तत्रथा चेति। इयाजादीनामपि
विभागमंगीकुर्वाणमपर्यायप्रयोगवचनावगतसाहित्यविरोधेन निरस्यति नचेति। न्यायतः प्रतिहरणप्रयोगं सक
लसूक्तवाकप्रयोगे प्राप्ते प्रयोगसमवेतार्थपदभागस्यासामर्थ्यादुत्कर्षो भविष्यतीतिचाशंक्याह अत इति। समुदायप्र
दृष्टसूक्तवाकश्रुतिबलीयस्त्वाल्लिंगगृह्यविभागं बाधित्वा गुणेन वाकेन विदितिसाध्यानुसारादिंद्रादिपदानां प्राजाप
त्यादौ प्राजापत्यादिपदानां चेंद्रादौ गौणतामदृष्टाय भविष्यतीति साध्यानुसाराद्यदृष्टार्थत्वमध्यवस्यामइत्युक्ते मं
त्राधिकरणविरोधाददृष्टार्थतानुपपत्तेत्याशंक्य मंत्रवर्णबलात्पौर्णमास्यामिंद्रादेरमावास्यायां च प्राजापत्यादेर्देव
तात्वेन शास्त्राददृष्टत्वाद निष्ठ्यापि प्रहरणे देवतावस्थ्य कल्पनमदृष्टार्थत्वोक्तो क्रमिति सूचनायां समवेतार्थस्य पद
स्यैव नियतानर्थकानीत्यदृष्टार्थत्वोक्तिर्याख्येयमाथनिर्दिष्टत्वान्तच्छेदेन परासृष्टस्य विषयस्तं देवतानंतरमस्तस्प्र
हरणोध्यवस्यामइत्युक्तो। दर्शपूर्णमासनाम्नः समुदायवाचित्वनिरासस्य सामानाधिकरण्येन यागनामत्वनिश्चय इ २९

तिपौर्णमास्यधिकरणवार्त्तिकेऽक्तत्वात्प्रत्येकमितिकर्त्तव्यताद्वयप्रतिपादकत्वं भाष्यसंमतं वक्तुं वचनार्थं समुदा
यस्य फलसाधनत्वं निरसितुं शंकते कथं पुनरिति। निरस्यति अत्रोच्यत इति। ओकं द्यावेष्टया गतं हीति। धातोः प्रत्येक
समवेतयागत्ववाचित्वेपि नामार्थवाचिनो धातोः समुदायलक्षणार्थत्वं भविष्यतीत्याशंकते नन्विति। धात्वसामानाधिकरण्या
धीनत्वान्नामत्वनिश्चयस्य नामोपि प्रत्येकवृत्तितावसीयत इति परिहरति नेति। पौर्णमास्यधिकरणे चैतद्विस्तरेणोक्तमि
त्याह तदिति। अतः सत्यपि नाम्नि न समुदायः फलवानित्युपसंहरति तेनेति। ह्वानां समुदायीकृतयोर्द्विकयोरितरेतरयोगा
ख्यसमुदायविशिष्टयोः फलवत्त्वावगतेः समुदायस्य फलवत्त्वमाशंक्येतरेतरेत्यनेन करणविशेषणत्वमात्रं समुदायस्या
वगम्यते न करणत्वमुक्तं। एवमपि साहित्यविशिष्टानामितिकर्त्तव्यताद्वयः स्यादित्याशंकते नन्विति। परिहरति नेति। प्रधान
साहित्यस्यैकस्यैव वक्तुं विहितत्वादङ्गविद्याविवक्षा न युक्तेत्याशंक्योद्देश्योपादेयगतत्वरूपलक्षणभेदाद्विवक्षाविवक्षयोर्व्य
वस्था युक्तेत्याह एकमपि हीति। सांगाभ्यां दर्शपूर्णमासाभ्यां स्वर्गं कुर्य्यादिति युगपत्साध्यसाधनेतिकर्त्तव्यताविशिष्टभाव
नाविधावेकस्याग्नेयादेर्युगपत्फलेतिकर्त्तव्यतान्वयेपि युगपदुद्देश्यत्वोपादेयत्वविरोधं शंकते कथमिति। आवार्य्योमा

तुलश्चेति द्वयैकद्वेपि दृश्यते। अपेक्षाहेतुभेदेन व्यवहारः स्थ्यकयेति श्रुतशास्त्राधिकरणोदाहृते द्वश्लोके विरुद्धानामथ
पेक्षणीयभेदेनैकत्रयुगपत्संभवस्योक्तत्वादुक्त विरोधस्याकिंचित्करत्वमितिपरिहरति अपेक्षेनेति हेत्वक्यालंबनवाशिन्यापेक्ष
णीयमुक्तं। वक्त विरोधाभावेपि वैरूप्यनिमित्तवाक्यभेदापत्तेरेकेन शब्देन युगपद्रूपद्वयोक्तिर्विरुद्धेत्याशंकते नन्विति। यथा
29 जादिभिर्दर्शपूर्णमासावुपकुर्यादिति प्रधानोद्देशेनेतिकर्तव्यतां विदधतोपि मितस्य वाक्यस्य दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेतेति श्रुताद्वाक्यात्फलोद्देशेन प्रधानं विदधतो भेदसद्भावान्नानिष्टापत्तिरिति परिहरति कोवेति। स्वरूपेनैष्फल्यापत्तेः फ
लसाधनीभूतप्रधानोद्देशेनेतिकर्तव्यताया विधेयत्वात्फलान्वये विवक्ष्यमाणं साहित्यमितिकर्तव्यतान्वयेपि यथासिद्धा
नामेव प्रधानानामनुवादत्वादविवक्ष्यमाणमप्यापद्यतेवेत्याशंकते नन्वेति। विध्यपरिस्पृहीतत्वात्प्रतीतमप्यनादृत्यमि
तिपरिहरति सत्यमिति। प्रधानोद्देशेनेतिकर्तव्यतारूपविशेषणविधायिनि प्रकरणाम्नानादुन्नितेवाक्ये प्रधानसाहि
त्याविवक्षायामप्यंगप्रधानवाक्यसमूहात्मके महावाक्ये साध्यसाधनेतिकर्तव्यताविशिष्टभावनाविधायिनि फलंप्रति
प्रधानसाहित्यस्य विवक्षितत्वाद्वैरूप्यायेतिकर्तव्यतान्वये विवक्षितं तत्प्रतीयतानित्याशयेन कथमित्येतरयोगो विधि २९

तः शक्यो वारयितुमिति पृच्छति कथमिति। विशेषणविध्युक्तत्वाद्यत्वेन विशिष्टविध्यर्थस्य विशेषणविधिसंभवात्तदुरूप
स्याभ्युपगमनीयत्वाद्विशेषणविधौ च प्रधानसाहित्यस्याशक्यविवक्षत्वाद्विशिष्टविधावपीति कर्त्तव्यतान्वये प्रधा
नसाहित्यस्याशक्याविवक्षेत्याशयेनोत्तरमाह इहहीति। ग्रहपदे च प्रातिपदिकांशेन ग्रहोद्देशाद्विभक्त्यंशेन चैकत्वो
पादानाद्वैरूप्यपरिहारः शंकोत्तापि धात्वंशरूपे शब्दे प्रधानत्वाविनांशभेदात्तावादृशी श्रुणमासपदेपि समस्यमानप
दद्वयातिरिक्तसमाख्याशब्दरूपात्तावादेकैकेन च प्रधानत्वाविनाशाद्देनच्छरूपेण प्रधानोद्देशात्समासरूपेण च साहित्योपा
दानाद्वैरूप्यपरिहारः शंकोत्तापि धात्वंशरूपेव कामुपिनाधिरोहतीत्याह नहीति। इतिकर्त्तव्यतान्वये साहित्याविवक्षामु
पसंहरति तस्मादिति। साहित्याविवक्षायामेकस्यैव प्रधानस्येतिकर्त्तव्यतान्वयापत्तेरानंतर्यविशेषाद्बहुष्वस्यासिद्धेः
सर्वेषामितिकर्त्तव्यतान्वयो न स्यादित्याशंकानिरासार्थं तच्चेतिलाघवमवतारणम्। एवं ह्यावृत्तेतदिति। प्रतिशब्देन सर्वेषामि
तिकर्त्तव्यतान्वयित्वं यत्सूचितं तद्दर्शयतीत्यर्थः॥ आनंतर्यमचोदनेत्यनेन न्यायेनानंतर्यस्याकारणतया तदुद्धिविपरिह
तेः सन्निधित्वेनानुषंगाधिकरणेभिहितत्वाद्विशेषोक्तिः। यदि कस्यचित्प्रधानस्येतिकर्त्तव्यतांतरं निराकांक्षीकरण

समर्थं साक्षात्कृत्यादिनोपदिष्टं व्याख्यातम्ब्रह्मातिरिक्तानां प्रधानानामितिकर्तव्यताकां ज्ञानात्मकं प्रकरणं स्यात्तद्वेत
दक्षीत्यभिधानार्थमितिकर्तव्यताया इति लाघवाय वेद्य नवादध्याहारेण व्याख्यातमेकस्यापि चेत्युक्तं॥ प्रत्येति भा
ष्यावयवव्याख्यानायास्य चकथं सावरूपस्य प्रकरणान्तरस्य प्रकरणेनांगग्रहणसामर्थ्यस्याविशेषादित्युक्तं॥ सा
मान्यन्यायस्तु स्वाप्रवृत्ते योजनार्थं तस्मादिति भाष्यं व्याचष्टे तत इति॥ स्वरूपलक्षणसाध्यशेषप्रवृत्त दिहापीत्यादिवा नि
केतनभागे व्याख्यातं वाक्यमतेनूवचनादिति वेदितिसूत्रात् उराधिनः सर्वप्रवृत्तनिरासार्थमत्रेति भाष्यमवतारयन् सर्वव्या
चष्टे एवं चेति॥ प्रहृष्टाय मविषयं तीति भाष्येण सर्वदेवताकल्पकत्वस्यापि शंकितत्वात् एतन्निरासस्योपलक्षणार्थं सूत्र
नायाह स्वार्थं चेत्युक्ता देवतान्तरबोधनया व्याख्यातं। उत्तरव्यवहसत्वे गौणत्वस्य उत्तराल्लिंगाधिकरणे प्रसिद्धकर्मांग
भूतदेवताप्रकाशनसंभवे च देवतान्तरकल्पकत्वस्य ततश्चावचनं तेषामितरार्थं प्रयुज्येतेति नवमाधिकरणसूत्रे नि
रासादित्यर्थः। पुरस्ताद्वृद्धे भाष्यस्थोक्तशब्दव्याख्यार्थं वाक्यैतन्निरासमात्रविषयः॥ अथ सर्ववचनं सूत्रान्तमाविति
तान्त्रोपदेशसमाध्यर्थं कस्माद्धीत्यादिवाक्यानीत्यन्तं भाष्यं व्याचष्टे॥ अत इति॥ वाक्यवज्ञीयपादेनार्थयेवा। ३०

मित्यादि वदतीत्यंतं भाष्यं व्याचष्टे नहीति नचेति साध्यावयवव्याख्यार्थं निपातनापेक्षनानाप्रयोजनयुक्तत्वोक्ति
लिंगेत्यनेनोपपादिता तस्मादित्यादिना उरक्षान्यथा तु रक्षात्पदानामसंप्रयोगो त्याहत्या प्रयोगभेदेभिहितेकथंत
हिंसाधारणमनीत्यादिना थेण उरक्षात्परस्मात्पदानांतं चेतोक्तत्वाशक्यसर्वेषांश्लक्षवाकानां मध्ये यो पौर्णमासीदे
वताप्रकाशकत्वात्पौर्णमास्यंगग्रहणप्रयोगभोजः श्लक्षवाकाम्नदवयवभूतानां कतिपयपदानां कर्म्मकालेतं
त्रेण पठनीयता मामाम कालीनसर्वसाधारणतंत्रपाठबलेन स्वयिंतं अतोक्तिरित्यनेनोक्तं छात्रः समुदायस्यार्थं त्रितेने ५
प्रतिपादकत्वात्प्रातिपदिकोक्तं श्लक्षवाकत्वं विलक्षणक्तं तस्मात्ता त्साधनत्वाख्यकरणत्वं नाम्नी सुपसंहारार्थं विंतस्मा
दिति साध्यं बहुश्रमलक्षवाके षेक वचनायोगशंका ॥ जो ये वा मावास्या देवताप्रकाशकत्वादमावास्यांगग्रहणप्रयोग मा॥
निरासार्थं च सूक्तवाकेति साध्यस्याष्टवादव्याख्यायपदेनाशूनेनेत्य उभाषणश्चस्थ साध्योक्तशंकानिरासार्थं सू
क्तवाकेनेति साध्यं व्याचष्टे येन केनचिदिति । कात्मस्यहीति साध्योक्तशंकोपपत्ति निरासार्थं यद्यपीति साध्यं लिंगा
द्देवतापदोक्त पर्वद्वाक्यात्तत्समभिव्याहृतानामपि पदानामुत्कर्षो लिङ्गेनैकरूपलक्षणार्थंतो व्याचष्टे तत्र वेति । तस्म

दित्यधिकरणार्थोपसंहारमाधर्थंव्याचष्टे ॥ नीतीति ॥ भाष्योक्तमपिक्रमोपदेशपरिहारं दूषयितुमारभते ॥ इदमपिहि
ति ॥ यथा वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते इति जाते पुत्रे एकमाद्यस्मिन्नानएतामिष्टिं निर्वपतीति वजातेष्टौ वे
पसंहारादेकवाक्यत्वस्य वैश्वानरवाक्येष्वष्टात्वेन यदष्टाकपालो भवतीत्यादिवज्जत्वं न युक्तं तथेहाप्युपक्रमोपसंहा
रस्थानेत्रपदयोगेनैकवाक्यत्वस्य प्रत्यक्षत्वाद्वाक्यवदुक्त्वात्त्रयपद्येभाष्योक्तमपिसमाधानं न युक्तमित्यर्थः ॥ भिन्नकर्मत्वे
भिन्नदेवताप्रकाशनसामर्थ्येनान्योन्यानपेक्षत्वाद्भिन्नप्रयोजनत्वाच्चैकवाक्यता न युक्तेत्याशंक्याह ॥ नहीति ॥ यदनेन
हविषेति प्रसरप्रकाशनस्य सप्रधानाभ्यासप्रगमात्त्वमरादियित्वेनेष्टदेवताप्रकाशनस्यैकप्रयोजनत्वाद्यदनेन हवि
षेति प्रधानभूतानां तंत्रपदानां क्षीणातिपदास्वस्य योगादेकेन देवतापदेनान्वये देवतान्तरपदानां तंत्रपदैर्विनासा
कांक्षत्वेनेत्यर्थः ॥ शुभायितोक्तिनिमित्तत्वात्स्वैकवाक्यशहस्यैषां नावदेवतानां ह्याज्यादि हविर्द्रष्टृत्वेन प्रत्ययात्सुत्वादिष्ट
देवताप्रकाशनस्यैव प्रधानत्वावगतेः प्रत्येकवाक्यपरिसमाप्तिनिमित्तो वाक्यभेदः स्यादित्याशंक्याह ॥ तस्मादिति ॥ यस्य
पिता पितामहः सोमं न पिबेदित्यादिवदर्थतो वाक्यभेदेपि तंत्रपदात्मकशद्वान्वयादेकवाक्यत्वसिद्धिः ॥ परमार्थतस्तु ३१

ग्रहणं गत्वोपदेशात् प्रक्रियमाणस्य स्वरस्य प्रकाशनप्राधान्यावगतेरन्यार्थितोऽपि वाक्यभेद इत्यर्थः। देवतापदप्राधान्यं च विना
वाक्यभेदायोगाद्वाक्यभेदस्यापगमे देवतापदप्राधान्यात् एतेः यातेश्च अग्ने याशया ते अग्ने रजाशया या ते अग्ने हराशये त्युप
सन्मंत्रशेषः तत्सर्वं शिष्टेत्यादिरयमये इह हस्यतये वा मत्यं वरुणो ददात् इह हस्यतये वा मत्यं वरुणो ददाविति एवमादिदक्षिण
मंत्रशेषः सोऽहं तत्त्वमसीत्यादिशब्दोक्तस्यैव एक यदूर्जे द्विपदी हृत्यादि सप्तपदीक्रमणमंत्रशेषो वेत्यादिर्दिशुर्हिरस्युप
न्दसि श्रुत्वासीत्याज्यासादनमंत्रशेषश्च स्थूनासीत्यादिर्यथा शब्द्या प्रयुज्यते तथा चापि पुरस्तात्परस्तात्पदानामाहृत्या प्रयो
गापत्तेर्याज्ञिकानां तं न प्रयोगो विरुध्येतेत्याह यदि चेति। एकवचनालोचनया वैकस्यैव शब्दस्य वाक्यस्य प्रयोगापत्तेर्यथा पौर्णमा
सीदेवतावाचिनः शब्दास्ते पौर्णमास्यां प्रयोक्तव्या इति भाष्ये बहुवचनं विरुध्येतेत्याह प्रयोगेति। वाक्यबहुत्वनिरासस्तूपसंहरति
तस्मादिति। अतोऽन्यः परिहारो वाच्य इत्याह अतश्चेति। तमाह सम्भ्यन्त इति। यथैकस्मिन्निन्द्रावनेकविन्दुसमुदाये वसंसर्गि
ग्यरूपत्वेनानेकेषामपि विन्दूनां संयोगे सत्येकीभावादेकवचनान्त एव तोयशब्दः प्रयुज्यते न घटशब्दवद्बहुवचनान्तः विभागे
व सति ष्टयन्नाव मात्रापन्नेर्द्विबहुवचनान्तस्तोयशब्द एव प्रयुज्यते न कपालवदर्थान्तरशब्दो नापितोयाद्वा शब्दस्तथा शब्दवाक

शब्दोऽर्थैकस्मिन्देवतापदे भिन्नसंज्ञपदोपेते तस्मिन्समुदाये चेष्टदेवताप्रकाशननिमित्तत्वात्सूक्तवाकत्वं स्येष्टदेवताप्रकाश
नानामनेकेषामर्थैकप्रयोगवर्त्तित्वरूपे संयोगे सत्येकीभूय वा देवकवचनान्त एव प्रयुज्यते भिन्नप्रयोगवर्त्तित्वरूपे च विभागे
सति पृथक्त्वेनावभासापत्तेः सूक्तवाकशब्द एव प्रयुज्यते न सूक्तवाकादिशब्दस्तत्र च विभागेपि सूक्तवाकत्वं नापैतीत्याशयः
32 तथा च सूत्रमुपपादयति। सूक्तवाको हीति। अग्निरिदं हविरजुषतेत्यादीष्टदेवताप्रकाशनसामर्थ्यालोचनया प्रयोगवर्त्तिदे
वतापदसहितस्याभिन्नसंज्ञपदोपेतस्येष्टदेवताप्रकाशनस्येष्टदेवताप्रकाशकपदसमूहस्य सूक्तवाकत्वावधारणाच्च तया व
त्यादेवताशब्दस्य च तावद्देवतापदसमूहस्य कृत्स्नसूक्तवाकत्वोपपत्तिः थिंतु के भिन्नकर्मप्रयोगत भिन्नदेवताप्रकाशनानां भेदात्तु
र्थं तत्कारिणी पदसमूहानामेकवाक्यतेत्यादेः शाक्यदेवताप्रकाशकस्येष्टव प्रयुक्तत्वादिष्टत्वरूपप्रकाशपेक्षकत्वेन प्रकाशनैक
वचनार्थं प्रयोजनत्वश्चेत्युक्तं। यस्तु तद्देवतान्तरपदसाहित्ये देवतान्तराणामनुद्दिष्टत्वेनानुक्तवादनुपपत्तेरुद्दिष्टरूपोक्तव
चनस्यान्तरतया उद्भावापत्तेरुक्तसूक्तवाकः स्यादित्याह प्रयोगेपीति। सामान्यतः समवेतार्थपदप्रयोगमात्रेण सूक्तवाक्यसा ३२
कल्यासिद्धिर्द्देवतान्तरपदसाहित्ये च सूक्तवाकत्वापत्तिरित्युक्ता पौर्णमास्यामावास्ययोर्विभज्य प्रयोगे योजयतीति। तेनेति॥

निष्कर्षसिद्धौ युक्त्यपेक्षं पाठेनाभिमतः पदार्थानां कर्मकालेऽर्पितं प्रयोजनत्वावगतिः। नन्वर्वाचिष्ठेत्याद्यनुषंगाश्रितस्य
यातेऽग्नये इत्यादेर्मंत्रस्याग्न्यादिशब्दोक्तेर्वाशास्तेऽयं यजमानोऽसावित्यादेः सर्वनामनिर्देशद्वाराम्नातदेवदत्तादिनामघटि
तस्य मंत्रस्य यथायुक्तिसहितेन पाठेन कात्स्न्योच्चारणे तिद्दृष्टांतार्थः। समवेतार्थपदप्रयोगमात्रेणेष्टदेवताप्रकाशना
दनतिरिक्तत्वोक्तिसिद्धावपि प्रहरणे यथाम्नातसूक्तवाकोपदेशाद्विभज्य प्रयोगेन रूढेन सूक्तवाकेन प्रहरणं स्यादि
त्याशंक्याह स्वतश्चेति। सूक्तवाकशब्दस्य रूढिवैसत्येकदेशप्रयोगे कार्त्स्न्यं बाध्येत यौगिकत्वात्तु समवेतार्थपदसमू
हमात्रेऽवयवार्थोपपत्तेः कार्त्स्न्याबाधाद्विद्यमानाः प्रयोगसमवेता देवताश्च नातिक्रम्य यावान् सूक्तवाकभावस्तावत्साध्य
त्वात्प्रहरणस्य कृत्स्नेन साधितत्वोपपत्तिरित्यर्थः। कार्त्स्न्येन तर्हि ध्येहणं सूक्तवाकप्रसिद्धिर्न युक्तेत्याशंक्याह तेनेति।
स्वाध्यायकाले प्रयोगभेदानालोचनाद्दर्शपूर्णमाससमवेतदेवताप्रकाशननिमित्तं सर्वप्राकृतदेवतास्यपदसमू
हस्य सूक्तवाकत्वं कर्मकाले च प्रकृतिविकृतिभेदाद्विविधमित्येवं द्वेधा व्यवस्थितः सूक्तवाको ज्ञातव्य इत्यर्थः। द्वैविध्या
मेव विवृणोति। सर्वेति। द्वैविध्ये सत्यपि कथं व्यवस्थेत्याशंक्याह सूक्तवाक इति। यत्र स्वाध्यायकाले प्रकृतौ विकृतौ

वायाद्व सूक्तवाकोस्माभिर्निरूपितस्तैवस्तसूक्तवाकोन्यत्वसमवेतार्थनिरूपणात्सूक्तवाकत्वं जहातीत्यर्थः।
बहुत्वमपि सूक्तवाकस्य संभवति किंतु तदिह नेत्येवं भाष्यं गमयितव्यमित्याह भाष्ये पिचेति। उभे पौर्णमासे मावा
स्येऽपि तिष्ठाध्यायकाले प्रकरणविभागमात्रेणोच्यतः कृत्स्नवाकशब्दो प्रेतश्च सिद्धः स यथार्थं निरूढश्च प्रयोगेऽपि सूक्तदेव
तापदसाहित्यमात्रेण कृत्स्नसूक्तवाकशब्दो भक्तिसहितेन पाठेन कल्पित इत्येवं भूहनं गमयितव्यमित्याह तत्रेति। भा
33 ष्योक्तस्य सूत्रव्याख्यानिरासायैवकारः। संभवमात्राशयत्वेन बहुत्वोक्तिव्याख्यानेऽपि न चैतेषामित्यादिभाष्यविरोधः
प्रयोगवर्त्तिदेवतावाचिपदसमूहस्याभिमतस्वत्वपदोपेतस्यैकसूक्तवाकत्वाभ्युपगमेऽङ्गः परिहर इत्याशङ्क्यते येषामभि
मतस्वत्वपदोपेतानामभिन्नप्रयोगवर्त्तिदेवतावाचिनां पदानामन्योन्यसमूहः कंचिदेकप्रयोगसमवेतमर्थं न वदति
वर्त्ति३ तस्मात्त्र भिन्नप्रयोगदेवतापदसमूहः कर्मकाले सूक्तवाकत्वनिरासार्थं भाष्यं न त्वेकप्रयोगस्थदेवतापदसमूहस्य
सूक्तवाकत्वनिरासार्थं सूक्तवाके निराष्यत्वस्वाध्यायकाले सर्वशाखागतदेवत्यपदसमूहे प्रकृतौ च पौर्णमास्यामावास्ये मा
वास्यारव्ये च यागद्वयसमुदाये निःकृष्टप्रयोगस्यदेवतापदमध्ये पदसमूहे विकृतौ च सूर्याद्यादिपदमध्ये पदसमूहे। २२
सूक्तवाकः प्रयोगसमवेतार्थप्रकाशकत्वादेवचनकरणमिति भिन्नप्रयोगस्थदेवतापदसमूहस्य कर्मकाले सूक्तवाके ३

सूक्तवाकस्येष्टदेवताप्रकाशकत्वसमानरूपस्य संसर्गिद्दृष्ट्यवत्संसृष्टपाठे सत्येकवादे कवचनोपपादनार्थमित्ये
वंविरोधपरिहारस्ववनायोक्तेनगमनिकाप्रकारेण सर्वेषांतात्पर्याणामविरोध इत्याहुरस्मीति। इत्यलाद्यवार्त्तिकाशये
वासर्वंशहः॥ ॥लिंगशब्दक्रमसमाख्यानाकाम्यमुक्तंसमाम्नातं॥ ॥इहेत्याद्युदाहरणभाष्यं तात्पर्यतो व्याचष्टे। यू
नेति। तदेतामृतिसंदेहभाष्यं विचारस्यानंतरसंगतिं पादसंगतिं च स्पष्टयव्याचष्टेतानीति। प्रमाणांतरावगतक्रतुविशे
षाद्यपेक्षंलिंगं विनियोजकंनिरपेक्षंवेति विचारात्पादसंगतिः पूर्वपक्षवचनयुक्तौक्तवत्त्वयबोधकक्रमोल्लंघनोक्त्या
सिद्धांतवचनयुक्तौ च क्रमानुसारोक्त्या सूचितानुक्तेर्लिंगापेक्षवेदर्वाधिकरणेनोक्तप्रसंगाल्लिंगस्यापि जघन्यप्रमा
णापेक्षत्वाभिधानादनंतरसंगतिः। क्रमोक्त्या समाख्याप्युपलक्षिता। प्रकारोक्त्या लिंगस्यार्थतोवगतसामान्यसंबंधा
पेक्षोक्ता। याज्याकाजमित्युपक्रमादेवं सर्वत्रैवोपसंहारादेवोदाहरणबहुत्वादरस्य प्रतीयमानस्य प्रयोजनमाह। उदा
हरणेति समाख्यानविशेषणस्य सामिधेनीसामिदश्यपक्षे केवलाग्निदेवत्यपाथीकृतीयादिष्टिविषयत्वाल्लिंगवि
शेषणस्य विलिंगसोमारौद्रीष्टिविषयत्वात् क्रमविशेषणस्य समानलिंगानेकेष्टिविषयत्वादुदाहरणबहुत्वमित्यर्थः। य

वत्किं वित्वकरणान्नानुयाज्यानुवाक्याकं काम्यमकाम्यं वैंद्राग्नादिकर्म तत्र सर्वत्रैता याज्यानुवाक्या यथालिंगं भवे
युरिति पूर्वपक्षो । कथं किं तावदिति माष्टं ह्यावेष्ट नचेति । मंत्रादीनां देवतादिप्ररूपावयेनैष्फल्यापत्तेः क्रत्वपूर्वसाध
34 नांशावयेनवमेवद्यमाणेध्ययनविधिनैवन्या दृष्टार्थत्वापरित्यागेन पुरुषार्थानुवंधित्वाद्वयसिद्धेर्लिंगस्य प्रकर
णादिगम्यक्रतुविशेषावयानपेक्षत्वस्तवनार्थक्रममिति माष्टावयवंध्यारव्यानु लिंगादित्युक्ता अध्ययनविधिनासा
मान्यतः क्रत्वद्वयावगमेपि मंत्रप्रकाश्यस्य देवतादेः क्रतुमात्रानंगत्वात् क्रतुविशेषांगत्वे देवतादौ मंत्राणां लिंगवि
नियोजकत्वावगतेर्लिंगस्य च सामर्थ्यात्मकत्वात्सामर्थ्यस्य चार्थाद्वा कल्पनेकदेशत्वादित्येवं संदिग्धार्थनिर्णयमा
चेष्टापाराभिधानादनवगतक्रतुविशेषावयानां च मंत्राणां कयोद्वारेषां क्रतुविशेषोपकारित्वेनेति द्वारविशेषेण स
देहुवदयाह्लिंगेनाविनियोगापत्तेः प्रकरणादिगम्यक्रतुविशेषावयसापेक्षस्यैव लिंगस्य विनियोजकत्वात्समाया
दासं याज्यानुवाक्यानामिष्टिविधायिब्राह्मणप्रकरणेऽनाम्नानात्प्रकरणेन क्रतुविशेषावयानवगमेपि क्रम
समाख्याभ्यां क्रतुविशेषावयवगते द्वारविशेषप्रति संदेहोत्पत्तौ लिंगेन तदंगभूतदेवताप्रकाशनद्वारत्वनिर्णयाद ३४

माध्याचयेन क्रमापेक्षोशेः चेमःसुतरां बलीयानिति साध्यन्तोष४८

तद्याज्यानुवाक्यासमाम्नानं काम्येष्टिक्रमित्येवं सम्बद्धायाख्यार्थलिंगेत्यादिभाष्यं स्वरितानुपपादितमाह नासती
ति लिंगक्रम इति तात्पर्य्ये क्रमोक्त्यासमाख्यानुपलक्षिता नाह्निति तात्पर्य्येण वक्ष्यमाणलिंगबलीयस्त्वविरोधापत्तेः क्र
मापेक्षानयुक्तेत्याशंक्य लिंगानपेक्षितस्य क्रमादेर्लिंगाद्दौर्बल्येपि लिंगापेक्षितस्य क्रमादेर्बलीयस्त्वाविरोध इत्ये
वं परिहारार्थं सत्यमिति तात्पर्य्यं व्याचष्टाणः सर्वाह्नुपपादयति लिंग इति देवताविशिष्टानाम्यादिस्वरूपवाची देवता
शब्दः सामान्यतो याज्यानुवाक्ये अवगतेतद्विशेषसंदेहाभावेनाग्न्यादिस्वरूपेपि लिंगेनाविनियोगात्संभावनामात्रं लि
ङ्गोक्तं तत्तरां स्वपपादयति तुमारमते यद्दोति श्रावयेत्यादीनामेव वै सप्तदशः प्रजापतिर्यज्ञो यज्ञेन्वायत्त इत्यादि
वाक्यान्तरे वनादिमंत्राणां प्रकरणात्क्रतुविशेषावयेवगते लिंगस्याविनियोजकत्वदर्शनाद्वाक्यप्रकरणाक्री
नलिङ्गदेशानामिति ततः श्रावयेत्यादीनां क्रमावगतक्रतुविशेषावयानां समाख्यापेक्षा क्वाक्रमापेक्षा इत्यत
यत्र सर्वं क्रमसमाख्यापेक्षोपपादनार्थं कुत इत्यादितात्पर्य्यं व्याचष्टेनवेति। याज्यानुवाक्यासमाख्याविनामेयीना
स्वर्यायाज्यानुवाक्याकार्यांशे सामिधेनीकार्यांशे वा विनियोग इत्यज्ञानात्समाख्यापेक्षणीया। तावच्छब्दाबक्र

मं विना कस्यैंद्राग्नयाज्यानुवाक्याद्वयस्य कस्यामैंद्राग्न्यामिष्टौ विनियोग इत्यज्ञानात्क्रमोपेक्षणीय इत्यर्थः। कि
मर्थमाश्रयणीयेत्यपेक्षायामाह तथा हीति। द्वयमथ्रूपपादयति द्वयं तु इति। एवं च सति यज्ञविशेषं प्रति संदेहात्त
न्निर्णयो लिंगाद्भवतीत्याह तत्र चेति। याज्या समाख्यायायागगतकार्यविशेषावगमे पिकाम्येष्टिविषयत्वं स्व
तोक्तं न सिद्ध्यतीत्याशंकानिरासार्थं विनयाचेत्यादितात्पर्यं व्याख्यातुं शंकते। नन्विति। व्याचष्टे कथमिति। याज्याकां
डमित्येतावन्मात्रसमाख्यानाभ्युपगमेऽपि क्रमात्काम्येष्टिविषयत्वं सेत्स्यती। तद्विषयमन्यथा परिहरति अपि चेति
विशिष्टक्रमकेष्टिविशेषाशेक्रमेण समाख्याबाधेऽपि कार्यविशेषांशेपेक्षणात्तयाज्याबाधाविरोधः। सिद्धांतमुप
संहरति। अत समाचारात्समाख्यामात्राह। अकृतत्वयमिद्र विशेषणद्वयानर्थक्यशंकार्थमर्थे निराष्ट्याचष्टे। किम
र्थमिति। पार्थि रूतीयादिकेवलाग्निदेवत्येष्टौ सामदश्यानाम्नानेन सामिधेनीकार्यस्याप्राप्तेयवृत्थाकांक्षस्य सत्त्व
त्सामिधेनीकार्ये पि लिंगक्रमोपपत्तेः समाख्यानपेक्षणे प्रथमातिक्रमे कारणाभावात्सामिधेनीकार्ये एव वि
नियोगापत्तेः समाख्याविशेषणार्थवत्त्वोक्त्यर्थमसीनितार्थं व्याचष्टे तत्रैवेति। व्रातपत्यादिविशेषणस्वनायायामेया। ३५

दीनीत्यादिशब्दः। तत्रैवेत्येवकारेण सामिधेनीकार्य्ये विनियोगसिद्धेर्लिंगक्रमविशेषणमनर्थकमित्याशंकार्थ्य
मर्थेनिराष्ट्यावष्टेतेन नहीतिश्चेनकारणेन समाख्यानादेर्निष्टापन्निश्चेन कारणेन समाख्यानादित्येनावन्मात्र
मश्चित्यर्थः। समाख्यानादित्येनावत्त्रुक्तेयाज्यानुवाक्याकार्यातिरिक्तानां विलिंगानामपिचर्च्चायांयाज्यानुवाक्याका
र्य्यएवविनियोगापत्तेस्त्रासांवानाकांत्तिनत्वादृशक्तवाद्वयाज्यानुवाक्याकार्य्ये विनियोगायोगाल्लिंगक्रमानाद
राह्वसामिधेनीकार्य्येपिविनियोगायोगादानर्थक्यापत्तिर्लिंगक्रमात्समाख्यानाखेत्तुक्ते उरुर्वस्याइष्टेः स्वानुरूपया
ज्यानुवाक्याक्षाना निषत्रेयाज्यानुवाक्याकार्य्येपाठेनातीतक्रमबाल्लिंगवाद्ध्रुर्वेष्टियाज्यानुवाक्याकार्य्ये विनि
योगायोगाउन्नरेष्विसामिधेनीकार्य्ये समाख्याबाधेन लिगक्रमाभ्यांविनियोगः स्तेत्ययतीति लिंगक्रमविशेषणार्थ विद्य
रूपीतिराष्ट्रस्तादिशहेशब्दत्यर्थद्वैनैवकारार्थेव्याख्यातः। समाख्यामात्रान्नहिपाथीकृतीयादिष्वयाज्याकार्य्ये शंक्य
र्थसर्वाग्नितराष्ट्रंव्यावष्टेतादितिछ्राग्निवारुणस्यसोमारौद्रस्यवाकर्म्मणः स्वानुरूपयाज्यानुवाक्याप्रसिन्नाद्याज्या
नुवाक्याप्रसिन्नाद्याज्यानुवाक्यानपनाकांक्षिचोत्तिहितेलिंगविनियोज्यस्वानुरूपयाज्यानुबाधेनैन्द्रीवद्दगतंरामिति।

विनियोगशंकातद्व्यार्थं क्रमातिरिक्तबलवत्प्रमाणाभावः क्रमोक्त्याप्सुविनः। विलिंगतायेयीवेनोक्ता। विरोधवि
षयेबाधात्समाख्यायानिष्टत्वव्यापारतोक्ता। विषयप्रदर्शनार्थं यथेतिभाष्यं व्याचष्टे तामितिमनोज्ञं वामग्निं रुद्धेपु
रोहितइत्याद्यानां पृथुयाज्याइतिद्वयोश्चबाध्यं समाख्यावात्याथसामाम्नायनिकाथबाध्यामानहविर्विवासससामि
धेनीविनिवृत्सामिधेनीभुवन्नेयाणां बाध्यावस्मृतेः समाख्याथतुश्यहीनाभवतीत्युक्तार्थवेनताइतिसाधव्याख्यार्थं
ताइत्युक्तं। सोमारौद्रौहि सामिधेनीक्रमोक्त्यर्थं विनातीतानागतोक्तीव्याख्याततंत्रापिविवित्युक्तं। लिंगसमाख्यानादि
त्येतावन्मात्रात्तु र्मांग्नेयीनाम्नुवांब्रातपतीयादियाज्याउवाक्याकार्यं मनोज्ञं चापृथुपाजवत्याश्च सोमारौद्रीष्टिसो
मारौद्रीष्टिसामिधेनीकार्यं विनियोगसिद्धेः क्रमविशेषणमनर्थकमित्याशंक्याह यदिचेति। क्रमेणतर्हि समाख्या
वाबाह्रातपतीयादौसामिधेनीकार्ये विनियोग[illegible]स्यादित्याशंक्य क्रमविनियोगविषयेसमाख्या
वाक्षेपियाज्याकार्यविषयेविरोधात्सावादबाधइत्येवं परिहारस्सूचनायक्रमेत्युसतीत्युक्तं। विशेषणद्व्यार्थविवो
पसंहारार्थं तस्मादितिभाष्यं व्याचष्टे तस्मादिति॥ ॥अधिकारेचमंत्रविधिस्तदाख्येषुशिष्टत्वात्॥ ॥लिंगस्यसामा ३६

न्यसंबंधसापेक्षस्यापि विनियोजकत्वे सन्निहिते प्रसंगाल्लिंगवत्पाः प्रकृतेरपि सामान्यसंबंधापेक्षयापि विनियोजकत्वाभिधा-
नादनंतरसंगतिपादसंगतिस्पष्टत्वाद्दुक्ता प्रकृतानां विशेषरूपेणाम्नातानामपि विशेषरूपेण विध्यभावे विनि-
योगाकांक्षत्वात्तासामेवाग्नेय्यादिशब्देन ग्रहणापत्तेराग्नेई वैतास्या इति वत्सन्निहितवाचिसर्वनामार्थहित्तिनाग्नेयी-
शब्देन प्रकृतानामेव वर्णीयग्रहणावगतेः पूर्वपक्षायोगात्संदेहायोगमाशंक्य विशेषरूपाम्नानवद्विशेषरूपेण वि-
हितानामेव प्रकृतत्वविवक्षितत्वादग्निदेवत्यत्वोपलक्षितत्वस्य वाच्यपदार्थस्याज्ञोपस्थानाग्नेयत्वेनाविधेयरूपलक्षणा-
न्तरानपेक्षत्वेन सन्निहितत्वस्योपलक्षणत्वेनानन्वयादविवक्षितत्वावगतेराग्नेयीमात्रग्रहणावगमात्पूर्वपक्षसंभवेन
संदेहोपपत्तेः सर्वनामार्थविपर्ययं शोधयति ज्योतिष्टोम इति सन्निहितत्वाविवक्षा सामान्योक्त्या हि चिता पर मतेन दाश-
तयीत्यपि दाशतयीत्योपीति बाध्याहृतशब्दद्वयपूर्वपक्षवचनद्वयं किं भाष्यारूढत्वाद्विविधसंदेहोक्त्यर्थत्वेन तु वै-
ति संदेहसाध्यं यावत्पतत्वे निःसंदेहभाष्यात्पक्षद्वयप्रतीतिस्त्रैविध्यान्वितिरस्य [illegible] आशंक्यतस्माद्दाशतय्यालिंगवत्ते
मंत्राग्रहीतव्या इत्यनेन तात्पर्येण प्रकृतमात्रपक्षमुक्त्वा न विश्चयनेन सिद्धांते शंकितेनेत्सच्यत इत्यनेनाविशेषपक्षो।

पुरोडाशाख्यपरोविनियुक्तस्य कपालस्यानुपापवायेविनियोगवद्विनियुक्तविनियोगोप्यविरुद्धइत्याशयः कथंतर्हिनाष्येपदत्रयोक्ति
रित्याशंक्याहनवेति८

पक्रमाल्लिंगेनप्रत्ययोभवतिदाशतयेनापिकर्त्तव्यमित्यादिनाचाविशेषपक्षस्यैवस्पष्टीकरणात्पक्षत्रयप्रतिभा
नमाहयथादिति प्रकृतमात्रपक्षंद्रषयितुमुपक्रमतेनविनिगमाणाभावमेवोपपादयितुंक्रमसंयोगसामान्य
संबंधप्रकृतग्रहणासंभवेकल्पनागौरवापादकंकल्पासंबंधाप्रकृतग्रहणायोगादविशेषपक्षोपिनावदतिक्लेशस
ध्याऽप्रकृतमात्रनिर्द्धारणंतुनकथंचित्संभवतीत्याहमहतीहीति निर्द्धारणाख्यानिश्चयायोगमुपपादयितुमाह
येनहीति आग्नेयीत्येवमादिलिंगहीनितरात्योकेस्याग्नेयीशब्दविशेषात्मकस्यग्रमाणस्यप्रकृतापकृतसाधारण्याय
न्यथाविनिश्चयकृत्वात्प्रकृतानामग्रहणमित्याशंक्याहनवेति आदौसंदेहकालेदाशतयीस्वरूपेनाप्रकृतवाचि
नाशब्देनाविशब्दरहितेनाविशेषपक्षपरिग्रहादप्रकृतमात्रंप्रतीतिरितिनिवदनापिशब्दएवाध्याहार्यानेवशब्दइतिसू
चितंसंदेहसाध्यादप्रकृतमात्रपक्षाप्रकाशनेविशिष्टत्वादितिहेत्वर्थमुग्रावयवव्याख्यार्थायग्रहायमित्यादिसाध्य
तत्प्रकाशनंभविष्यतीत्याशंक्याहयदिति सोग्रश्रुतिस्थाष्टविनस्याग्नेयीशब्दविशिष्टमुपहेतोराग्नेयीत्येवमा ३७
दिमिहीनितसाध्योक्तस्याविशेषपक्षसाधकत्वादधिकारस्यकरणेयालिंगमालोच्यमंत्रविधिःसोनदाशतयीप्रकृते

পুরোডাশাখ্যাদে বিনিযুক্তস্য কপালস্য অনুপবাধে বিনিযোগবদ্বিনিযুক্তবিনিযোগোপ্যবিরুদ্ধ ইত্যাশয়ঃ কথংতর্হি নাষ্যে পদত্রয়োক্তিরিত্যাশংক্যাহ নবেতি

तस्यापि कर्मणो यथा मैत्रावरुणोपदेशेन कर्त्रन्तरोपदेशः प्रैषार्थस्य कर्मणो निष्कृष्य कर्त्रन्तरदेशनात्तथा विशेषविषयत्वा
त्सा कौ वह्निनाख्यानेन विशेषाख्याः प्रैषार्थस्य कर्मणो निष्कृष्य कर्त्रन्तरदेशनेऽत्र वसूपदेशोऽत्र दृष्टान्तमात्रार्थत्वात्सामान्य
विशेषसमाख्ययोस्तुल्यबले विशेषसमाख्याया बलीयसीति संदेहे यौगिकत्वेन द्वयोर्विशेषविषयत्वसाम्यात्तुल्यबलत्वे प्राप्ते
सामान्यसमाख्याया विशेषविषयत्वेऽप्यनेकविशेषविषयत्वेन सावकाशतया विशेषसमाख्यानवरुद्धेष्वपि विशेषेषु प्र
सक्ता प्रहस्त्यकपपत्तेस्मदवरुद्धेषु यथा तदुपपद्यता तेन कृत्यकल्पकतयानवरुद्धविशेषालोचनयापेक्षत्वेन सामर्थ्याद्विशेषस
माख्यानिरपेक्षत्वेन शीघ्रप्रवृत्तित्वात्ततो बलीयसीति सिद्धान्तमात्रमाह। विशेषेति॥ ॥तद्वल्लिङ्गदर्शनं। उदाहृतानां वि
शेषसमाख्याकृतविनियोगसाधकत्वाल्लिङ्गत्वमाशङ्क्य यथाध्वर्य्वादिसमाख्यानात्कर्मणोऽध्वर्य्वादिकर्तृत्वं व्यवस्थाय
था विशेषसमाख्यानेन कर्त्रन्तरदेशनात्तथा लिङ्गदर्शनमित्येवमस्य सूत्रस्य सिद्धान्तद्वयलिङ्गोक्त्यर्थत्वसूचनार्थं सामान्य
समाख्याकृतविनियोगलिङ्गमुक्तमित्याह सामान्येति। विशेषसमाख्यायाः किं लिङ्गमित्यपेक्षायामाह विशेषेति॥
प्रैषार्थं तु वचनं मैत्रावरुणस्योपदेशात्॥ प्रैषेषु तु वचनेऽध्वर्मैत्रावरुणोपदेशात्समाख्याबाधे दृष्टान्तितेऽप्रसंगात् किं सर्वेषु प्रै

षेणुवानुवचनेनुरवाध॰केषु विद्धेति चिंतेत्यनंतरसंगतिमाहउपदेशादिति। तत्रैतत्फदाहरणसाध्यंज्योतिष्टोमप्रकरणा
म्नातत्वादयुक्तमाशंक्य ज्योतिष्टोमप्रकरणस्य प्रदेशविशेषप्रदर्शनार्थं वोपपाद ... यति। ज्योतिष्टोमेति। सुत्याबात्यवा
मदैत्वांगानां प्रैषानुवचनानां दीक्षणीयाद्यंगप्रैषानुवचनवदनुदाहरणत्वशंकानिरास॰प्रदेशोक्तिप्रयोजनं वाध्यसा
38 मान्यसमाख्याविषयविवेकपूर्वसंदेहमाहतत्रेति। पूर्वपक्षमाहकिमिति। सामान्यवचनात्प्रैषानुवचनप्रत्ययइत्यु
क्तेपशब्दादन्यानन्ययुक्तयो॰प्रैषानुवचनयोर्मैत्रावरुणकर्तृकत्वप्रतीते॰सामान्यवचनासिद्धिमाशंक्य तत्सिद्धौ प्रौढ्या च्यो
त्ययोगोक्तिमसिद्धेत्याहेशपविशेषणत्वेनाविवक्षायुक्तमाम्नूयमाणश्चेत्यादिनासंभवत्येवेतीति। हेत्वर्थेतिकरणमेनानन्य
योगात्तुक्तिरुक्ता। सिद्धमंत्रस्तुयोश्च प्रैषानुवचनयो॰पृथक्क्रेयत्वापाद्यत्वेनान्वा व्याययोगान्नदसिद्धानेय च्योयमसहितप्रै
षानुवचनविषयत्वापत्तेस्तन्निरास॰प्रैषानुवाक्याधिकारो वा प्रैषसंनिधानात्। सिद्धांतप्रतिज्ञार्थं पूर्वावयवं पूर्वपक्ष
व्याख्यायर्थवाशङ्ख्याख्याः पूर्वंख्यात्ब्धेन सवेति। उभयोर्यद्युक्तप्रैषानुवचनवाचित्वेनप्रैषानुवाक्योक्तिर्व्याख्याः पूर्वंता ग्राधि
करोतिप्रधानीकरोत्युद्दिशति मैत्रावरुणविषयेऽयमुपदेशइत्येवं कर्तृकृत्यत्वेनोद्देशवाच्याधिकारोक्त्यंगीकारेण साव राम ३८

३८

वगतेर्विशेषतोग्निर्देवतास्या इति सन्निहितत्वाद्विसर्वनामार्थ इति विवादाग्नेयीशब्दस्य सन्निहितार्थविषयत्वावगते रग्निदे
वतात्वं चैदमुक्तं वच्च संनिहितत्वस्यार्थस्य पदार्थोपलक्षणत्वावगमात्कृत्यतु गृहीतसंनिधिलक्षणाप्रकरणाद्यावर्तकत्वं सु(
विधत्तीत्याशंकाह सन्निधीति । उपलक्षणत्वप्रतीतावर्थविशिष्टं हि लक्षणमित्यनेनन्यायेनोपलक्षणानां विशेषणवि
शेष्यत्वायोगादेकेन चोपलक्षितस्यान्यपदार्थस्योपलक्षणांतरानपेक्षत्वान्न द्वितीयांतप्रातिपदिकोक्तस्याग्निदेवतात्वस्य
स्त्रीप्रत्ययोक्तस्त्रीत्वान्यथानुपपत्त्यागम्यमानत्वं स्त्र्यर्थस्याप्युक्तशब्दगम्यत्वेनाश्रूयमाणविशेषत्वादगत्यासत्वत्वे यैदिसंनिहित
त्वस्याप्युक्तत्वियद्भावाद्युक्तं सर्वनामगम्यत्वादनुपलक्षणत्वावगतेरग्निदेवतास्त्रीत्वेप्युक्तनिपर्यवसानात्संनिधानस्याप्युक्तत्व(
तु यद्यसावलौकिको न्यायः सूचितः प्रकृतासाग्नेयीत्वसंज्ञात्वाकृत्य विरोधमाशंक्य यौगिकशब्दानां व्यक्तिं वा विज्ञात्सक्त
त्यक्तिमात्रग्रहणेप्युक्तिर्मको वापन्निर्यौगिको न्याय सूचितः । ताध्यसाप्युक्तमात्रपत्तोपपादनार्थं विशंकानिरासायाविशि
षपत्त्युपपादनफलसिद्धांतनिरासार्थं तां सूचयितुमाह तस्मादिति । उपदिष्टेति । साध्यमविशेषपत्तेनुपपन्नमाशंक्य सावधा
रणत्वेन व्याचष्टे उपदिष्टेति । एवंजातीयकस्येति । साध्यावयवं व्याचष्टे एवमिति । कथंजातीयकस्येति प्रश्नः साध्याशयमाह कथं

39

थमिति। विशेषणरहितस्याविषयत्वाद्येयाश्रोत्रादिकरोति। त्याख्यातप्रत्ययविहितत्वरूपेणोपदिष्टत्वेनोपलक्षणात्वश्रुतग्र
हणं भविष्यतीत्येवमाशयं कथं जातीयकस्येति सिद्धांतिप्रश्नस्य मत्वा निरासार्थं यः कश्चिदित्यादि यहीतव्या इत्यंतेना
ख्यातुपदिष्टत्वोपलक्षणरूपायाः प्रकृतग्रहणोपपत्तेः सिद्धांतिनो निष्टत्वाद्युक्तमाशंक्य परमार्थतः सिद्धांत्यनालिमताभेदो
पदिष्टत्वोपलक्षणरूपं प्रकृतग्रहणोपपादितिष्ठोऽस्वत्तामात्रेण सिद्धांत्यपरितोषेनापरिकल्प्य पूर्वपक्षीयः कस्मिंश्चिदित्यादि यह
तव्या इत्यंतमाहेत्येवं तात्पर्यं तस्यावद्यावषष्ठपरःश्च नारीति। लिंगशब्दव्याख्यायाः सुलिंगमित्येतद्विषयत्वं यः कश्चिदि
त्यावयवस्य चोपदिष्टत्वरूपोपलक्षणनिरासावतारमात्रार्थत्वं पूर्वयितुं मध्यपतीकेनावतारितं अत्र राघेयदीतिशब्दा
त्यव्यवगतेन लिंगपदेन याप्येयाश्चाख्यातप्रत्ययसामर्थ्यस्य विषयभूता ख्यातप्रत्ययविधि[illegible]वेत्येवं समाख्यातप्रत्ययसा क्रिता ४
मर्थ्यं तस्योपदेशकस्याख्यातस्य मंत्रविषयत्वं लिंगमिति षष्ठीसमासाश्रयणेन तदुपदिष्टत्वस्य लिंग मित्यसमासाश्रयणेन
वा तत्तस्य विधीयमानस्य मंत्रस्योपलक्षणं विवक्षितमित्युक्ते कथमेतदभ्यात इत्यपेक्षायामुपलक्षणे पक्षांतराश्रको
लिंगेनोपदिष्टे सवतीति विध्यतावधसंगोपन्यासाईवता लिंगस्योपलक्षणत्वे तदयोगादित्युक्तं। एतदेवसाधयत्रव ३९

वलि ३

एवंशो व्याविरव्यात्सुर्यः कस्मिंश्चिदिति। ताध्यावयवं तावदध्याहारेण व्याचष्टे नासाविति। उपदिष्टत्वस्यैव स्फुटस्याविशेष
णस्य संसवा कथं नान्तरोपदेशमर्हतीत्याशयेन कथमिति। दृष्टोपदिष्टत्वस्योपलक्षणत्वं रूपविशेषणत्वं निरासार्थं यद्वी
ति। साध्यमापाद्योक्त्यर्थं द्विनव्याचष्टे तदिहेति। पश्चालंतरं निर्वापो विधीयते तेन प्रकृतौ तौ हि विहितौ यदि न विधीयेते ततः श्रु
कृतौ लभ्येते यावालंस निर्वापौ कर्त्तव्याविति। आलंस निर्वापाधिकरणभाष्योक्तेन न्यायेन कर्त्तव्यता वा विनाप्रत्यये नोपल
त्तणी भूयद्याश्वत्यारव्य विशेषणं कर्त्तव्यमित्युक्ते तस्य विशेषणत्वोपपादनार्थं तद्दीत्युक्तं। यनेति। साध्यावयवादस्यार्थ्यमेवाभि
गश्चाह्य थौ विसीयत इत्याह तथा चेति। तत इति। साध्यावयवं व्याचष्टे तत इति। अथेति। साध्यावयवं व्याचष्टे अथेति। तनेति। सा
ध्यावयवं व्याचष्टे तेनेति। तस्मादित्युपसंहारसाध्यं व्याचष्टे तस्मादिति। सिद्धा त्विति मतं प्रकृतग्रहणपयस्तु क्त्यर्थं नन्विति
साध्ये प्रकरणस्याविशेषकत्वादयुक्तमाशंक्य साक्षात्प्रकरणस्याव्याख्यानत्वेऽपि विधेर्द्वीघवापादकत्वेन गौरवापादका
प्रकृतग्रहणव्यावर्त्त्यं किं वाशयतया व्याचष्टे नन्विति। प्रकृतानामपि संहारस्यैव कर्त्तव्यस्यावगतेर्द्वारान्तराश्रयाहंनिद्दिरिक्त
त्वं च यरूपसामान्यसंबंधानवगमात्प्रकरणस्य विधिलाघवापादकत्वात् उपपन्ने विनियोजकत्वेनैव प्रकरणस्य प्रकृतमं वाभि

यामकत्वं वाच्यमित्यापाद्य बलवद्विरोधेन नियामकत्वनिरासार्थं नेती निराचष्टे श्रुतिविनियोज्ये मंत्रे लिंगविरोधे पन्या

सादयुक्तमाशंक्य देवतारूपविरूपलिंगयुक्तश्रुतिलक्षणार्थं वृत्तलिंगशब्दं व्याचष्टे लिंगमहीति । प्रसंगात्सर्वेषु पूरित

न्ना: शुद्धा लिंगशब्दा: श्रुतिलक्षणार्था इत्याह उपरिष्टादिति । अविरोधशंकार्थमाहेत्यादि निराचष्टे आहेति गौरश्वव

तिवा श्रुत्या यज्ञो वाद्यवधारितं । विशेषे यदि तत्रस्यात्स्यात्ततः श्रुतेर्बाधनमिति तत्रूताधिकरणवार्तिकोक्तन्यायेनाविरो

धइत्यर्थः । यत्किंवा दिवेनाग्नेय्यादिशब्दानां जातिवा विग्रवादिशब्दवैषम्याद्विरोधसमर्थनार्थं नैतदिति निराचष्टे नेति

ति । जाति वा विशालादेपि वैय्याकरणमते भसंबंधवादिवैं मद्वाय्यक्तौ नामवाच्यत्वादप्रकृतमंत्रव्यक्त्यग्रहणेपि श्रुतिविरोधे

नास्तीति शंकाशय विवरणार्थं सूच्यत इत्यादि निराचष्टे सामान्यस्येति । आग्नेयीवादिजात्यसावान्मंत्रदेवतासंबंधमेवाने

क मंत्रव्यक्तिसमानत्वात्सामान्योक्तरास्तिवेत्यतस्यैव प्रतिमंत्रव्यक्तिसमाप्तिरुक्ता तस्मादित्यनेनन वेहेति निराचष्टे शेषे ।

व्याख्यातः प्रकृतायामपि व्यक्तौ समस्तशब्दार्थसंबंधानित्यं श्रुत्यबाधेपि विकल्पेनाप्रकृतानां प्रासानां बाधात्पदे श्रुति

विरोधोपसंहार्य इति विरोधसमर्थनाशयाविवरणार्थं सूच्यते सत्यमिति । निराचष्टे लिंगात्सामान्यमित्यनेन यद्युक्तेरश्लोतत्वाक ४०

रि स्या

ष्विष्टयागेपिश्रविरोधस्योक्तत्वादयुक्तमाशंकाद्युक्तिंवाविद्वाशयत्वेनव्याचष्टेश्रुतरश्चेति।नवेतिशंकातात्पर्यंद्युक्तिंवावि
द्वाशयनिरासार्थत्वेनव्याचष्टेनवेति।जिज्ञासास्वर्वंद्युक्तिंवाविद्वाशयसमर्थनद्वारास्वपक्षसमर्थनार्थश्चिन्त्यातइत्याद्यपरमि
त्यंतेनार्थंद्याविरद्यास्तुजिज्ञासासाध्यंतावदवतारणस्वंद्याचष्टेपरश्चेति।किंवेतिनिर्णयस्ताध्यंस्वरूपतस्मादाद्याचष्टेसावेति
तात्पर्यमिति।व्याख्यातुमाकृत्यधिकरणोक्तजातिवाचित्वविरोधंशंकते।किंपुनरिति।विरोधपरिहारार्थंपरेषांव्याख्यांदूषयि
तुमुपन्यस्यति।नेतीति।जातिवाचित्वानपङ्क्तेर्व्यक्तीनामश्रौतत्वाद्व्यक्तिविरोधद्वारास्वपक्षासिद्धापत्त्यादूषयति।तदिति।सूमने
व्याचष्टेश्रुतइति।नकेवलंजातेर्वाच्यतापङ्क्तयतेकिंतुसद्भावोपीत्याह।नापीति।जात्यंतराराावेष्टेष्टथजातिरेवानष्टव्यारद्य
देवतात्वितापंक्तजननात्वितापश्रजातिर्वाच्यास्तविष्यतीत्याशंकानिरासार्थत्वेनदेवतेवेतिस्तार्थंद्याचष्टेदेवतासंबंधमेवेति।श्रा
मेयोष्टाकपालःशिरोवाएतद्यज्ञस्ययदाग्नेयःआग्नेयोवैब्राह्मणइत्यादौइत्यादिष्वपिश्रयोगादिदमग्निप्रेत्यपेक्षतःशब्दार्थः।संबंधा
द्यतिचाविततस्यैववाच्यताकस्मान्नेष्टेत्याशंक्याह।संबंधश्चेति।शंकित्वालिंगात्मामान्यमिति।सामान्योक्त्यासंबंधस्यवाच्यत्वेनो
पन्यस्तत्वात्स्वानतिमतत्वस्वनार्थंसाध्यकारेणेतमुक्तं।श्रानंतर्यमितिश्राराध्यदोषापनेयंयुक्तिंवाविवंनसंभवतीत्याहतस्याए

वेतिग्रहणेन तत्त्वोपस्थापनसाधनस्य युक्तिर्दैवतयोपलक्षयितव्येत्येवमानन्त्यव्यभिचारपरिहारार्थं विनयेत्येति व्याख्यावयवो
व्याख्यातः ॥ देवताया अग्न्यादेः स्वरूपलक्षणत्वात्स्वरूपगमे शब्दस्य वा प्राप्ते दैवतात्वस्य च संबंधिरूपत्वात्प्रतिसंबंधिनं विनाऽप्र
तीयमानत्वात् संबंधिन्याः स्वरूपाया अन्यत्वे प्रतीतिसंभवादवाच्यत्वाप्राप्तिरित्याशंक्याह सर्वेति। देवताविशेष्याया अन्यत्वे स्वप्रत्ययवाच्यत्वात्
स्वरूपगमे विधानं सूत्रं प्रकृत्यर्थमभिप्रेत्य प्रत्ययार्थस्य देवतात्वस्य विशेषणत्वाप्तेः प्रकृतिप्रत्यययोर्विशेषणविशेष्याभि
धानशक्तिभेदविरोधापत्तेः ॥ प्रत्ययेन विशेष्याभिधानमेवाविरुद्धं न तु विशेषणाभिधानमिति सावधारणो न्यायः सर्वेति। गवा
दिशब्दवल्लक्ष्यमाणाया अपि प्रत्यक्षे विशेष्यत्वसंभवाद्धि विशेष्यत्वसिद्ध्येऽपि न वाच्यत्वकल्पना युक्तेत्याशंक्याह यद्वेति। गवा
दिशब्दस्य जातौ व्यक्तौ वा समयत्वेन वाचकत्वस्यास्मृतेः शब्दभेदाद्वा वाचकत्वभिन्नशक्तिभेदानवगतेर्लक्षणप्रयोगान्यथाऽनु
पपत्तिमात्रेण शक्तिद्वयकल्पनापत्त्या व्यक्तिप्रतीत्यविनाभावेन तत्प्रतीतिसिद्धान्यथानुपपत्तिपरिहाराद्विशेष्याभि
धानं युक्तं। न हि तत्र सास्य देवतेति स्मृत्येवास्य शब्दनिर्दिष्टे विशेष्ये देवतात्वे च विशेषणे वाचकत्वावगमाद्व्यक्तिद्वया ५१
स्वरूपगमे विकल्पना गौरवानापत्तेः स्वरूपाभिधानं युक्तमिति व्याख्यापारयितव्येवोक्ता विधानाख्यायां व्याख्यायां तथाऽप

पत्न्याः कल्पयितव्यत्वाभिधानात्सूचितं । सास्य देवतेति स्मृत्यास्य शब्दस्य निर्दिष्टस्य विशेषस्य स्य इति संबंधित्वमात्रमवगम्य
तेन वाच्यते त्याशंकयः स्मृत्या स इति संबंधिनो वाच्यत्वाउक्तो लक्षणयावगतिसंभवे यथाग्नेयी शब्दस्य तात्पर्य्यात्लावापक्षे र
ग्निशब्दवदाग्नेयी प्रथमोपसदित्यादौ विशेष्यसमानाधिकरणः । प्रयोगो न स्याद्देवताशब्दवच्चाग्निसमानाधिकरणः प्रयो
गः स्यान्न चैतद्द्वयमप्यस्ति यतो देवताख्यविशेषणमात्रवाची सन्नाग्नेयीशब्दो लक्षणया विशेष्यपर्य्यन्तं नीयते तत्राह न चेति । दे
वताख्यस्य च विशेषणमात्रस्य तद्धितवाच्यत्वात्प्रयोगमेमंत्रकरणके व्यापारे देवतायाः करणकार्य्यात्मकत्वेपि तद्धितान्तप्रा
तिपदिकप्रकृतिबलवत्वात्कारकविशेषत्वबाधेन सहार्थे तृतीयामप्रयोगश्चाग्नेय्यादिवदुपस्थानकर्मवत्वमेव संभवा
न्न लाक्षणिकविशेष्यमाश्रियेतेत्याह यदि चेति । अनेन चानेकद्रव्यक्रियासाधारण्या सामान्यरूपस्य देवताख्यविशेषणमात्र
स्य तद्धितवाच्यत्वात्प्रयोगमेयया देवतया यद्यत्क्रियासाधनं लक्षयितव्यं सैवात्रोपस्थानेकरणत्वायोगोपि कर्मत्वेनाग्नि
न्याद्विना समानासती साधनं न विद्यत इति किं द्रव्यात्किं लक्षणया इत्येवं व्याख्यातं देवतैवेति तावयवस्य सूचितं । यत्किं वा
विद्योपपादनार्थं नियमस्य तात्पर्य्यस्य द्रव्य येतुमाह नत्वादिति । विसराव संबंधटीकायां पिंगाद्यकहायनीशब्दयोर्द्रव्य

विरोधोपपादनार्थं सर्वयौगिकानां व्याख्या किं वा विरोधोपपादितेत्याह तादिति । व्या किं वा विरोधोपपादनस्य विशेषपक्षसिद्ध्यर्थं वि
क्यर्थं नचेत्याह पादादीरव स्यंतेत्यर्थः सत्त्वे पतो व्याचष्टे तत स्त्विति । प्रकृतमपीत्य विशेषोक्तेर्यथाश्रायमिति त्याद्या क्लेशे
तोपदेशायोग विरोधशंकार्थं न शितित्याद्ययथास्वाय्यमित्यनेनापि प्रकृतमात्रोपदेशाय योगोक्ति द्वारेण विशेषोपदे
शस्यैवोक्तत्वेनाविरोधादयुक्तमाशंकाप्रकृतमात्रोपदेशोयथाश्रायमिति भाष्येणोक्त इति प्रांतस्य पशंकेत्येवमुपपा
दयितुमाह नाहीति । भाष्ये त्वुक्तस्यार्थः प्रकृतमात्रपक्षस्य परमतेन किं तद्व्यतिरिक्ताः इति संदेहवार्ति किं प्रकृतस्य का
र्यातिरोपयोगेनेत्याह्युपपत्तिवार्त्तिकेवादात्वुक्ताद्दाद्योसामान्यशास्त्रस्य विशेषशास्त्रेण बाधस्यादिशहेनोक्तश्च ।
उच्यत इति परिहारस्त्वाद्ययथाश्रायमिति त्वाद्याद्यर्थविवरणार्थं तयाव्याचष्टे परस्त्विति । मध्यमतात्याद्य त्वव्वत्तद्वार्त्तिकोक्त
क्तमाशयैवेति । अनेनाविशेषोक्तेर्यथाश्रायमिति त्वाद्य विरोधाख्य दोषाभावोक्तत्येनने वं संतीतित्वाद्याव यवोव्या
ख्यातः । व्याविशेषोक्तेर्भाष्यविरोधाख्यदोषाभावेपि प्रकरणबाधाख्योदोषास्येवेत्याशंकार्थं न शितित्याद्यं प्रकृत्याप्रक
णबाधस्यायुक्तत्वादयुक्तमाशंका विरोधार्थं प्रकृतेः सामान्यवाचितांगीकार्येत्येवमाशयत्वेनव्याख्यातुमाह ॥ ५२

स्थितेति सत्यमिति परिहारस्तात्पर्यं श्रुतेः प्रसिद्धार्थत्यागो न युक्त इत्येवमाशयवत्त्वेन व्याख्यातुमाह पर इति वैकल्पिकपदार्थ
मध्ये नित्यमर्थे कथं योगे विरोधात्तावानित्यं प्रकृतमान्वयग्रहणेपि श्रुतत्वात्तु ग्रहोपपत्तेर्न प्रकरणं बाधनीयमित्याशंकानिरासा
र्थमपि चेत्यादि तात्पर्यं स्वोपकारमनपेक्ष्य प्रमाणोपकारार्थं बुद्धिः सर्वकारिणः प्रवृत्त्युपयोगात्प्रमाणान्वयहार्थ इति शंकान्तरमुपप
त्तेरयुक्तमाशंक्या लौकिकादिशान्तप्रवादनिरासार्थत्वेन व्याचष्टे अपि चेति। किं तर्हीत्यनेन यदिति ताच्छब्दाध्याहारो व्याख्यातः। प्रवृत्ते
रात्मान्वयग्रहार्थत्वेपि प्रकृतमात्रेणापि कृत्स्नोपकारार्थेन फलेन फलवत्त्वात्मान्वयहसिद्धेर्न प्रकरणं बाधनीयमित्येवमाशयत्वे
न किमिति प्रश्नस्ताच्छब्दाध्याहारेण व्याचष्टे तत इति। उभयथाप्यात्मानुरोधेन बलवत्प्रमाणफलत्वतायाः प्रवृत्तेः संकोचो न युक्त इत्या
शयेनोत्तरार्थमेतदिति ताच्छब्दाध्याहारेणावतारणत्वेन व्याचष्टे अत इति। यद्यप्याग्नेय इत्येकरूपैव श्रुतिः। बहुषु प्रकृतेषु प्रकृतेषु च
प्रमाणं तथापि क्वचित्प्रकृतमन्त्ररूपेर्थे प्रमाणमनुगृहीतमिति प्रमाणानुरोधेन पुरुषस्य कृतार्थत्वादप्रकृतमन्त्ररूपाण्यर्था
न्तराणि पुरुषार्थत्वेपि क्वाप्यपि सन्ति न गृह्यन्त इति यच्छंकायां ते तत्र त्येन तदनः प्रवृत्तेः प्रमाणान्वयहार्थत्वात्ताबद्भवतीत्येवं योज्यं।
प्रवृत्तेः प्रमाणान्वयहार्थत्वात्स्वरूपगमे निष्ठापत्तिमाह समुद्रेति। तस्मादिति। सर्वपक्षोपसंहारस्ताच्छब्देन व्याचष्टे तस्मादिति तस्मा

गृहसिद्धौ दुर्बलप्रमाणानु ५

छब्देन किं परामृश्यत इत्यपेक्षायाम विशेषेणोक्तेः प्राकृतस्यानिर्दिष्टत्वात्सर्वनाम्नापरामर्शायोगमाशंक्याह लिंगप्रत्ययविरह
त्वादित्यचक्रक्रतेरविशेषेणसर्वमन्त्रग्रहणसामर्थ्याद्विना विरोधायोगाल्लिंगशब्दो देवतालिंगयुक्तायाश्रुताविवाविशेषग्र
हणसामर्थ्यात्पिप्रयुक्त एवेत्येवशब्दोक्तपर्युक्तेन लिंगेत्यनेनोक्तं। दाशतयाम्यपीत्याद्यपिशब्दालोचनाडपदिष्टोपदेशो हि
त्यादिराद्य[illegible]स्यसावधारणत्वप्रतीतेरविशेषपक्षोक्त्यर्थत्वसंभवेपिस्त्वेपिशब्दाभावात्कथम विशेषपक्षप्रतीतिरित्याशं
क्याह सूत्रमपीति प्राकृतदाख्यानामतदाख्यानां चोक्तत्वात्स्वव्याख्यासंभवादतदाख्यमन्त्रग्रहणार्थत्वावगतेर्नावधारणा
र्थताप्युक्तेत्याशयः। तदाख्यो वापि तर्हि कस्माच्छब्देन नोक्त इत्याशंक्याह तदाख्ये वेति ॥ ॥ तदाख्यो वा प्रकरणोपपत्तिभ्यां॥
पूर्वपक्षसूत्रस्थेनातदाख्यशब्देन च प्रकृतानां विधेरुक्तत्वात्सिद्धान्तसूत्रे तदाख्यपदं नर्थवत्तस्य परिसंख्यार्थत्वेन तदाख्य एव म
न्त्रो विधीयत इत्येवं कर्मविध्युक्त्या विधिशब्दानुषंगेण व्याख्यार्थं तदाख्य इति भाष्ये तच्छब्देनानिर्दिष्टज्योतिष्टोमपरामर्शायो
गादयुक्तमाशंक्या[illegible]धिकारविषयत्वाद्बुद्धिस्थस्य ज्योतिष्टोमस्य परामर्शसंभवं वक्तव्यं बुद्ध्याद्याह वषट्कारादिकारख्य इति
ज्योतिष्टोमांगेति ष्टोमसंज्ञकत्वस्योपचारिकत्वेनापरितोषाद्व्याख्यान्तरमाह ऋत इति प्रश्नोत्तरत्वेन सौत्रप्रकरणशब्दव्या ४३

ज्यो१ शब्देनाप्रकृतानां च ४

स्यार्थप्रकृतौ हीति भावः तात्पर्यतो व्याचष्टे क्रतु इति। अयमाशयः। उपस्थानाख्यः पदार्थः क्रतुसंबंध्युच्येत विशेष
सन्मंत्रकार्यत्वेनोपदिश्यते स चानेन मंत्रेण क्रतुसंबंधि किंचित्कार्यमिति सामान्यतः क्रतुसंबंध्युच्येयात्वयप्राप्तिं विना
तद्विशेषावगत्यनाकांक्षणाद्वैकोविधात्रुरसतः पदार्थस्वरूपमात्रात्प्रतीतेः क्रत्वंगत्वाधीनत्वाच्च सामान्यतः क्रत्वंगात्व
यस्याप्रकृतानां च क्रत्वंगत्वयारात्वान्न सामान्यतः क्रत्वंगावगमप्राप्तिरस्तीत्याशयः। सर्वार्थमुपपादयति आग्नेय्येति। आख्यानव
त्संस्कारकमन्त्रेषु उपस्थानस्याग्नीध्रादिमं उपस्थरूपप्रयुक्तत्वे क्रतुकार्यविशेषत्वं न स्यात् हिरण्यधारणवत्स्वतंत्रपुरुषार्थत्वेन
वक्रत्वैकांतिकस्याध्याग्नीध्रादेर्दृष्टादिवल्लौकिकत्वात्स्वरूपेण प्रयोजकत्वं संभवति। फलाश्रवणात्त्वनम्युतं न पुरुषार्थत्वं स्या
स्यतो वलादुपस्थानस्य क्रतुकार्यविशेषत्वावगते ज्योतिष्टोमादि सर्वस्वीकारसिद्ध्यर्थं उपस्थानमाग्नेय्या करोतीति शास्त्रार्थ
स्याश्रयितव्यत्वात् ज्योतिष्टोमस्थ वैद्य कार्यविशेषस्य मंत्रकार्यत्वेन विधिर्निर्दिश्यत इत्यर्थः। उत्तरार्द्धमुपपादयितुमाह स
वेति। स्वरसतः पदार्थस्वरूपावगत्यप्रतीतेराकांक्षां च विना क्रत्ववितरूपलक्षणयोगादित्याशयः। सामान्यावयापेक्षत्वेपि वि
शेषावगत्यस्य कथमप्रकृतमन्त्रनिवृत्तिरित्यपेक्षायामप्रकृतविधेर्वाक्यभेदापत्तिमाह तथेति। प्रकरणादेव सामान्यावगति

द्धेर्वाक्यभेदपरिहारं शंकते नन्वेवेति। अनेन वा न्याय्यत्वोक्तिः सूचितवाक्यभेदपरिहारशंकार्थत्वेन कथमिति प्रश्नः भा
ष्ये व्याख्याति। श्रुतिकल्पनां विना प्रकरणस्याविनियोजकत्वात् स्वकृते पृथक्प्रकरणाम्नानात्सामान्यान्वयविषयायां
श्रुतौ कल्प्यायां सत्यां आग्नेय्यादिवाक्यकृतविशेषान्वयसिद्धेः पृथक्कृतेषु सामान्यान्वयविषयश्रुतिकल्पनस्याशक्य
त्वात्प्रकरणेन सामान्यान्वयासिद्धेरपरिहार्यो वाक्यभेद इति न ज्योतिष्टोमं प्रतीत्यत्र स्वरसात्सूचितमर्थमाह प्रकृत्य
मिति। प्रकरणात्सामान्यान्वयो सिध्यन्नपि विशेषान्वयसिद्ध्यर्थं यथाउपपन्नलक्षणया प्रकरणतुल्यत्वान्न श्रुत्यर्थापि
त्त्यासेत्स्यतीत्याशंकते नन्वेवमिति। श्रुतार्थापत्तेः शब्दकल्पकत्वेनार्थापत्त्याख्यस्यार्थस्यापि श्रुतिकल्पनापेक्षत्वात्प्र
करणतुल्यत्वान्न श्रुतिमकल्पयित्वार्थात्सामान्यावगतिः सेत्स्यतीति परिहरति नेति। सामान्यतः कर्त्वंगान्वयापादक
त्वेनावकृत्वद्वयस्य सामान्यान्वयोक्त्याविवक्षितत्वान्न स्वर्गयागान्वयवत् द्वारत्वेनांगान्वयात् उत्पत्त्यादितया शास्त्रविषयत्वा
न्न विधायकश्रुतिकल्पनापेक्षेत्याशंक्याह यदीहीति। प्रयोगकाले तु निष्पादित्वेपि शास्त्रार्थावधारणकाले नेन मंत्रणक
तोरुपकर्त्तव्यमिति सामान्यान्वयानवगमे स्वरसतोऽवगतस्याग्नीध्ररूपान्वयस्य त्यागायोगात् कृत्वद्वयाग्नीध्रान्वयाउन ४४

स्या१

ष्यादित्वान्वयानुपपत्तेः शास्त्रविषयतास्त्येवेत्याशयः। कवयिसिवारित्वेनाग्नीध्रस्य तदन्वयात्तु निष्पादित्वं कर्तृत्वयाद्य प्र
योगकालेप्यस्त्येवेत्याशंक्याग्नीध्रस्यत्तु ह्यादिवक्तृत्वयसिवारित्वेनाग्नीध्रस्य तदन्वयात्तु निष्पादिमंत्रस्य कर्तृत्वन्वयात्स्या
गाग्नीध्रस्वरूपान्वयापत्तेः कर्तृत्वयसिवार्थ्याहवनीयादिस्वरूपाविनस्याधानस्यैव न कर्तृत्वयोऽप्यादीत्येवं परिहारस्तु व
नार्थेन केवलं शास्त्रार्थावधारणकालेऽनिष्पादित्वं नास्ति किंतु प्रयोगकालेपीत्याह। कित्वेति। कर्तृत्वं गवानपेक्ष्य प्रत्यक्षे
गम्यमण्डपरूपाश्रया लौकिकोस्ति। ततश्च लेशेनाप्यर्थाकृतिकल्पनापत्तेरप्य द्विवर्शपस्कृतिः कल्पयितव्या। ततः प्रकर
णान्न कर्तृस्कृत्सायां सत्यां कल्पयितुं शक्येत्याशयेनोपसंहरति। तेनेति। स्मृत्साया: श्रुतेः प्रकृतमंत्रमात्रविषयत्वाद
प्रकृते च सामान्यान्वयश्रुतिकल्पनाग्नेयीवाक्यस्य प्रकरणान्न विरुद्ध्येतेत्याशंक्याह। सर्वेति। स्मृतसामान्यान्वयप्र
कृतस्मृतिविषयत्वेनाग्नेयीवाक्योपपत्तौ सामान्यान्वयकल्पनापादकसर्वार्थेयी विषयत्वानुपगमो न युक्त इत्याश
यः। उक्तेऽर्थे लाघवं योजयति। अप्रकृतानां ज्योतिष्टोमप्रत्यनेन मन्त्रेण ह्याविप्रतेत्येवं रूपसामान्यान्वयाश्रयसेरप्यापक
त्वहेतोराशंक्य प्रकृतविषयत्वेपिनो वाक्योपपत्तौ कल्पनागौरवापादकसर्वविषयत्वानुपगमाप्रयोगाद्धेतोर्व्यापक

नादिति २

शंक्या

वं यथेत्पने नोपपादितं । अनेन तृसाध्येण हि विधोपि सर्वपन्नो निरस्तो भवती तिसूचयितुमाह । इतरथेति । सिद्धांतेपिप्र
करणान्तरोपाधौ अक्रुतिसंकोचापत्तिलक्षणो दोषोस्तीत्याह । एकतेति । विधिकृत्याख्यव्यापारलाघवायाप्रेयीक्रतिसंको
चं वेस्यापेक्षितत्वान्नस्याख्यपुरुषप्रवृत्तिहेतुत्वेन क्रत्पंतरस्योपवली यस्मान्न संकोचो दोष इत्याशयः । वरं प्रकृतानां
त्वासन्नवाक्षीयं ब्रह्मेद्वेहि विलंवानापत्तिलक्षणो गुणः । प्रकृतग्रहणेन विधती त्याशंक्याह एवं चेति । प्रकृतेषपि द्वारांत
रात्मक विशेषाव्ययाहीनिर्हारकत्वव्यलक्षणसामान्याद्वययस्यावैकृतसत्वाद्विशेषान्वयविधयोगाशंकानिरासार्थं विन
सोवोपपत्तिशब्दव्याख्यार्थं व्यापारविशेषेक्तिसाध्यं व्याख्यातु शंकांतावदाह नत्वचेति । वेदशास्त्रवानंत्याद्वोध्यास्तु पलव्या
सावेनासावनिश्चयायोगमाशंक्याय स्थायप्रकृतः सकार्यांतरे विनियुक्तो यः कस्मिंश्चिद्विशेषेणोपदिष्ट इति च भाष्य
द्वयसंवादेनासावनिश्चयो यद्यपीत्यनेनोक्तः । मन्नवाक्यपगमेपि भाष्यविरोधाख्यो दोषोस्तीत्यपिशब्दार्थः । कार्यांत
रविनियुक्तस्यापि मंत्रस्योपस्थानाख्यव्यापारविशेषविधानमुपपद्यत इत्येवं भाष्यव्याख्यां सूचयन्परिहारमाहु
यत इति । कार्यांतरविनियुक्तानामप्युपस्थानाख्यव्यापारविशेषावयिवेनपुरोडाशकपालस्येवोपवापाभावयित्वेनेव ४५

वग्रहणसंसर्वात्र निर्द्धारके च द्वयलक्षणसामान्याद्वयासावे दोषो नापि साध्यविरोध इत्यर्थः। शंकार्थं भरवि निर्युक्ता
नं तर्हि विशेषाद्वयस्यैव स्वाभ्युपगमात्सामान्याद्वयत्वे नास्ति प्रेतस्यज्योतिष्टोमं प्रति व्यापारस्य शास्त्रादेवेति साध्यावयवेन स्प
स्फक्कि विरुध्येतेत्याशंकते न चेति। विशेषांतर्गतत्वेन प्राप्तिरस्ति प्रेतानष्ठानं चोपेणेति परिहरति कथमिति। विशेषांतर्गत
स्य सामान्यस्य नैराकांक्ष्येण विशेषांतराद्वयानर्हत्वात्प्राप्तस्फक्किरनर्थिकेत्याशंक्याह तेनेति। प्रकृतत्यर्थत्वेन निराकांक्षस्यापि
प्रयाजादेर्विकृत्याकांक्षायां कांक्षासत्वाच्यद्वारविशेषाद्वयेन निराकांक्षस्यापि च द्वयलक्षणस्य सामान्याद्वयस्योपस्था
पनार्थं द्वारांतराकांक्षया कांक्षया कांक्षासत्वाद्द्वारांतराद्वये स्फक्तियोग्यतेत्याशयः। विशेषरूपविवक्षोत्याकांक्षोद्धाप
नं स्फुचितं अनेन चोपस्थानार्थव्यापारविशेषविधानवेलायामविवक्षितत्वात्साक्षादव्यापारविशेषस्येत्येवं सामान्याद्व
यप्राप्तस्फक्त्यानर्थक्यशंका निरासार्थत्वेन प्राप्तत्वादिति साध्यावयवो व्याख्यातः। अतोऽर्द्धवलिङ्गकरणगम्यसामान्याद्वया
पेक्षानयुक्तेत्याशंक्य वाक्यभेदपरिहारार्थं उर्द्ध्वलापेक्षानुपपन्नेत्येवं निरासार्थत्वेनानुपपत्तिशब्दव्याख्यार्थमनपेक्षत्वेति
साधयनुपस्थानमंत्रलक्षणानेकार्थविधिनिमित्तवाक्यभेदोऽन्यार्थत्वेनासमसमानमाक्षिपति यद्यपीति। विशिष्टविधिसंभवेऽपि वि

46

शेषण विशेष्यरूपानेकार्थविधानाद्वाक्यभेदोस्य प्रसज्यमानः सिद्धांतेथपरिहार्य इत्यादित्याशंक्याह सिद्धांतेपीति तत्रेति
वार्त्तिकोक्तं सामान्यविशेषावयवलक्षणेनेकार्थविधावपि विशेषावयवसिद्ध्यन्यथानुपपत्तिप्रसूतेन विध्यंतरेण सामान्याव
यवविधानमविशिष्टविधावपि श्रुत्याक्षत्यावापि कृतार्थविधिमात्रेण कृतार्थस्य प्रत्ययस्याकृतार्थविध्यान्तरापाशंक्य श्रुत
स्य प्रत्ययस्याह नित्यमापाद्य विधिगौरवमेव वाक्यभेदश्चेन्नापवर्तितमित्येवं साध्यसमाधनेतस्मादिति कथं पूर्वोक्तो वाक्यभे
दोऽनवताष्टे योज्यप्रत्ययपेक्षायामुपस्थानस्याग्नीध्रस्वरूपावयवेनैष्यत्वापत्तेर्ज्योतिष्टोमांगभूताग्नीध्रावयवावगमेन ज्योति
ष्टोमात्पूर्वसिद्धार्थत्वावसायाज्ज्योतिष्टोमात्पूर्वसिद्धार्थमुपस्थानमेवं लिंगनमंत्रेणकुर्यादित्येवं मंत्रस्य ज्योतिष्टोमीयका
र्यविशेषावयवोक्त्यर्थत्वेनोपस्थानं चेति साध्यावयवमंत्रस्य वोपस्थानस्वरूपाद्यनिर्थत्वेनैष्यत्वापत्तेः सद्वेति साध्यस्य स्यात
द्धस्य ज्योतिष्टोमकार्यसामान्यपरामर्शेतात्पर्यावसायान्तद्वेतिसाध्यावयवं सामान्योक्त्यर्थत्वेनाख्यावष्टतत्वेति प्रदर्शन
शहस्यकरणप्रकृत्यन्तवावस्त्राक्तसाध्यमध्येउपस्थानं चेत्येतद्वाक्यं विशेषप्रदर्शकं तद्वेतिविषयकरणनिरपेक्षस्याग्नीध्रज्योतिष्टो ४६
मार्थविशेषप्रसृतोपस्थानपरामर्शित्वावगमान्तत्रचविशेषावयवस्योपस्थानं चेति साध्योक्तत्वात्पौनरुक्त्यापत्तेर्विशेषावयवभिमकार्य

माह्वयस्यदेवतारूपेणविहितेनोपलक्षितस्यमंत्रमात्रस्यज्योतिष्टोमाह्वयप्रदर्शनार्थमित्यर्थः।ज्योतिष्टोमाह्वयस्यप्रदर्शि
नीयतामाहवनीयाशासतामुक्तामुपपादयितुंप्रकरणनैरपेक्ष्योक्तिः।आग्नीध्रसदोहविर्धानीकवैकांतिकवाहनत्वरूपाह्व
यमात्रविधानेयत्तुनिष्पादित्वेनक्रत्वन्वयसिद्धेर्वाक्यभेदपरिहारशंकानिरासार्थत्वेनानर्थकश्चोपदेशःस्यादसंबंधात्फलव
तानत्वनुपस्थानंफलवदितिसूत्रमवतारयतिअथेतिक्रत्वैकांतिकत्वेथाग्नीध्रादीनामुपस्थानस्यतत्स्वरूपाह्वयित्वधर्मत्वेन
तद्द्वारकक्रत्वन्वयायोगादाग्नीध्रादिशब्दानांचसंस्कारनिमित्तत्वाभावेनाहवनीयादिवत्स्वरूपनिष्पत्त्यैवैधसंस्कारानपेक्षणा
न्नैष्फल्यापत्तेरुपस्थानस्वरूपेमंत्रोपदेशस्तन्मंत्रस्यफलवदसंबंधापत्तेरनर्थकःस्यादित्येवमर्थत्वेनस्पष्टत्वात्फलवतेत्य
नेनमन्त्रावयवमध्याहृत्याययनहीतिसूत्रावयवस्याग्नीध्रादिद्वारोपस्थानस्यक्रत्वन्वयायोगेपिप्रकरणात्क्रत्वन्वयोपपत्तेःफल
वत्त्वंविध्यतीत्याशंकानिरासार्थत्वेनावतारणार्थंनवेतिसाध्यंगौरवलक्षणवाक्यभेदपरिहारोपयोगपर्यंतत्वेनव्याचष्टे।
नाहीतिप्रकरणात्क्रत्वन्वयश्चतीयमानोप्यविधीयमानोनुष्ठानानिष्पाद्यतइतिसामान्यावयस्यापिविधेयत्वाद्गौरव
स्यापरिहार्यत्वापत्तेःक्रत्वन्वयश्चनत्पस्थानंनफलवदित्येवंशंकानिरासार्थत्वेननहीतिसूत्रावयवव्याख्यार्थंयदीत्यादि

अर्हतीत्याद्यंतं साध्यं तात्पर्यं तस्यावद्यावचेष्टेनविति। सामान्याद्वयोश्च विधीयमानेनैतिष्यद्यत इत्यर्थः। एतदेव साध्यं स्वरू
पतोद्यावष्टयदीति मंत्रविशिष्टस्याग्नीध्रादेरुपस्थानस्य प्रकरणगम्यो ज्योतिष्टोमाद्वयोर्यद्युष्टातुमिच्छेत तदा विधिं विनाऽनु
ष्ठानायोगाज्ज्योतिष्टोमाद्वयित्वेनोपस्थानमुपादिश्यते तत्सिस्तस्यैकरणायोपदेशोऽन्यतार्थे कर्त्तव्यय विद्यापत्युक्तावपि
विवक्षाको विधित्सार्थत्वात्स्फपगमेतस्यैव कर्त्तव्यय विद्यापत्युक्तिः सेत्स्यतीति मन्वानदेतिसाध्यावयवमपेक्ष्य भाष्यं योऽग्नि
तं। स्वरूपमात्रेणोपस्थानस्य मंत्राद्वयविधातुपस्थानमात्रे मंत्रप्राप्तिरुक्ते नियाख्याते कर्त्तव्यमविधायेत्युक्तं। यथा कथ
विरास्तोपस्थानानुवादेन मंत्रविशेषोऽनुवाद्यस्योपस्थानस्याग्नीध्रादिना विशेषणमशक्यत्वादाग्नीध्राद्यनुवादेन मंत्रवि
शिष्टोपस्थानविधावपि प्राप्तिवात्मार्थी वश्यश्रुन्नवक्रकर्त्तव्यानस्फपगमेस्तुतंत्रप्रधानकर्मत्वापत्तेः सर्वोपस्थाने मंत्रप्र
स्फपपादनायाग्न्याविधिर्विशिष्टविधिरूपेण चेत्युक्तं। कर्त्तव्यानपेक्षत्वोक्त्यर्थत्वेन सर्वशब्दस्यास्थ्यार्थं लौकिकोक्तिः
प्र कृत्प्रकारफलत्वाभावेऽपि पुरुषार्थरूपेण फलवत्त्वामाशंक्य फलाश्रुतिः श्रुद्दोक्यो त्वयाद्यनुवाद्यस्योपस्थान
स्याद्दिहेविधेयोवद्यतीति विद्धिधेयस्यापिवादशापविप्रेणग्रहं संमार्ष्टीतिवत्प्रकरणाद्विशेषलाभमाशंक्य प्रकरणबाधं ४७

लाघवोक्तं संमार्गविदा न वैयर्थ्येणोपपादयितुमनन्तमितप्रकृतितो ज्ञाफलत्वायोपतिष्ठति प्रकृत्या प्रकृता सर्वसाधनां
शलक्षणार्थं प्रकरणापेक्षणाद बाधितेन प्रकरणेन प्रकृतिमनुमायोपस्थानं विशेष्यत इत्याशंका निरासार्थं न प्रकरण
मिति लाघवावयवं प्रकरणस्थान्यनिह्नवो व्यापारालावेत्थ सर्वसाधनां शलक्षणाद्वारार्थाद्विशेषकत्वोपपत्तेरयुक्तमाशंक
कत्वत्वया विधानेऽसर्वलक्षणारावेनाविशेषकत्वोपपादनार्थं निहीत्युक्तं । प्रकृतस्यापि तर्हि मंत्रस्योपस्थानमाद्यात्वया
दानर्थक्यं कथं स्थितं तद्वोपस्थानस्य मंत्राद्वयार्थं कृत्वत्वयं विधौ गौरवं स्यादित्याशंक्य प्रकृतं तद्यत्कर्म कर्तृत्वयत्वात् कृ
त्वं गोपस्थानविषयत्वावगते वैयर्थ्यो ज्ञार्थमसमत्वात् प्रेष्यतं नित्यादि लाघवं व्याचष्टे अस्मत्पक्षे त्विति लाघवं वेत्यनेनानादि
ति लाघवावयवो व्याख्यातः । अनि लाघवोक्तार्थमथ वेति लाघवं व्याचष्टे अथवेति ॥ आग्नीध्रादीनामंत्राणां च प्रासवाडस्वयया
थो संबंधविधानस्य यत्नो लौलक्षणत्वेन तत्र खशब्देन संबंधो विधीयत इत्यादि जाघन्याधिकरणलाष्ठेवक्ष्यमाणत्वाद्वावर्थ्या
विधाने पिव प्रत्यया यथेरताया लावनायाविशेषणपरे पि विधौ विधायकप्रगमात्वद्वयद्वारावगतस्य कारकयोः परस्पर
त्वयस्य विधेर्लावनयाप्याघावच्छेदकधात्वर्थापेक्षायामात्मनेपदालोननयालिधानात्प्रधानार्थावच्छिन्नत्वावगमादात्मनेप्या

सान्निहित २

यीश्रुमसिदध्यादितिवाक्यार्थप्रतीतेरग्न्याद्याहीत्यादिसिद्धविषयामंत्रेणविसदृश्यादिग्रुकैः समीपस्थानं विनासिधाना
शक्तेः ग्रामस्य समीपस्थानस्यानुवादोपपत्तेरग्न्यापि सामान्यात्तु यद्वद्विधानादतिलाघवमित्याशयः। उपतिष्ठत इत्यात्म
नेपदालोचनया समासीदतीत्यर्थः प्रतीयते शक्तिवदनाराध्यक्रान्ता सिधानान्यथाउपपत्त्योपस्थानधात्वभिरुक्ता॥ सर्वेषां चो
पदिष्टत्वात् केवलाश्रुकृतपक्षसमर्थयितमनेनतावद्विशिष्टत्वादित्याद्यपूर्वपक्षहेतुदूषणार्थंत्वेनाउत्तराघणपूर्वसूत्रंव्या
वष्टेयक्षिति नतेनिर्माल्यतां यांतीतिस्मृत्यातत्यामत्रनिषेधादस्यपेत्यवादमात्रेण विधिलाघवलक्षणयायाचगतसूक्त
तमात्रविषयत्वादाग्नेय्येतिवचनाद्यातयामस्यापि विधिरूपपनिरुक्ता। पदेजुहोतीति त्वविशेषशास्त्रेणाहवनीयेजुहोतीति
सामान्यशास्त्रस्याविषमशिष्टविकल्पयोगात्समुच्चयेचाश्रुतप्रधानाहत्यापत्तेर्बाधोवद्युतेगुणाहत्तिरूप्रधानाविरो
धेनोचितैवेत्याशयः। ग्रुमतेन शिष्टत्वादिति पूर्वपक्षसूत्रावयवोक्त्याप्राग्यसिद्धान्तहेतुदूषणनिरासार्थंत्वेन पूर्वव्याख्येत
थेति। यदप्युक्तं लाघवेनाग्न्यस्याउमाहयत्किंचिद्विधिप्रत्ययोक्तेन कार्यान्तरोपदिष्टत्वेन विशेषणास्यहृतमात्र
ग्रहणं वाच्यं न चतत्त्वं संलवति प्रत्ययस्योपलक्षणत्वात्स्फपगमे विधायकत्वायोगापत्तेरित्येवं प्रत्ययेनविशेषणस्य सिद्धा ४८

गाध्यमुपतिष्ठत इति २

तद्धेतुत्वमापाद्याशिष्टत्वादित्यवयवोक्तदूषणोद्धरणार्थत्वेन व्याख्यातुमाह यदीति। क्रमसामान्यावयवप्रकृतमंत्र
विधौ विशेषावयवविधिमात्रेणाग्नेयी विध्यर्थत्वोपपत्तेः सामान्यविशेषावयवकल्पनापादकमाग्नेयीमात्रग्रहणं न यु
क्तमित्यनेनैव न्यायेन प्रकृतमात्रग्रहणरूपविशेषासिद्धेर्न प्रत्ययेन विशेषणं सिद्धान्तहेतुत्वेनाक्षिप्तमित्येवं परिहारा
र्थत्वेन सोऽयं चशब्दो व्याख्यातः तदिति। सायंतनज्योतिष्टोमं शतिमित्स्याद्याणारुविधानमुपपद्यत इति सायंतनेन सिद्धान्तहेतु
त्वं वदतोपदिष्टत्वेन विशेषणं सिद्धान्तहेतुत्वं नाभिप्रेत इति उत्तरमर्थादुक्तमित्येवं व्याख्यातुमाह तदिति। इति भासनवि
वक्षयोपहासार्थं शोलतिः प्रयुक्तः। न केवलमनर्थैव सिद्धेः प्रत्ययेन विशेषणमनाक्षिप्तं किं त्वसंसवादप्यतीत्येवं सञ्चव्या
ख्यार्थमपि चेति सायंव्याख्यातुमाह तथा हीति। वशब्दार्थो हिशब्दः। उदाहरणार्थं सर्वं इति सायंव्याचष्टे सर्वाहीति। स्वाध्या
योऽध्येतव्य इत्यध्ययनविषयेणाहरहः स्वाध्यायमधीयीतेति ब्रह्मयज्ञविषयेण वाक्येनामे सर्वा ऋचः सर्वाणि यजूंषि स
र्वाणि सामानि पारिप्लवं शंसतीति वाक्येनाश्वमेधविषयेणाश्विने शस्यमानेत्यादि स्वर्थोनात्स्फुदियादपि सर्वा दाशतयीरत्व
त्वयादिति चाशिक्षानाद्यध्यात्मर्थाविरुद्धा विषयेणाप्रत्ययेनताः सर्वा विहिता इत्यर्थः। तेनेति सूत्रार्थोपसंहारसायंव्याख्या च

श्वि१

अनइति। तस्मादित्यधिकरणार्थोपसंहारं तात्पर्यं व्याचष्टे १

ऐतैंतस्मादिति। प्रकृतमात्रग्रहणेन सामान्यान्वयकल्पकार्थापत्तिप्रतिबंधमात्रं विधिलाघवापादकत्वात्सिद्धांतहे
तुर्न्नप्रत्ययेन विशेषणमिति तस्माद्धिव्याख्यानायोक्तं॥८॥ ॥लिंगसमाख्यानान्तरात्मन्त्रार्थत्वानुवाकस्य॥ ॥मुख्यसा
मर्थ्यात्मकमेव लिंगं विनियोजकं गौणसामर्थ्यात्मकमपि वेत्येवं सामान्यान्वयापेक्षं लिंगं विनियोजकं निरपेक्षं वेति
वंच लैंगिकविनियोगप्रकारे लिंगस्वरूपगते सापवादप्रसंगे चिंतिते साक्षाद्वादवादितेषु सामर्थ्याद्विक्षेपस्तुष्टयेषु लिंगं
विनियोजकं न वेत्येवं विषयगतलैंगिकप्रकारचिंतार्थत्वेन पादसंगतिं लिंगश्रुत्योश्च सामान्यान्वयसिध्यपेक्षिताउन
न्वक्रमप्रकरणाद्युपरोधात्संकोचलक्षणे बाधेनंतराधिकरणद्वयेनोक्तेऽपि सामान्यान्वयसिद्धेर्मन्त्रानुवाकस
माख्यापेक्षणात् लिंगबाधस्य प्रसक्तस्यापवादादनंतरसंगतिस्पष्टत्वादनुक्ताप्युत्सानुवाकोदाहरणप्रयोजनमाह
समस्तेति। ताष्टेत्यादिशब्दकल्पन्यायोदाहरणांतरग्रहणार्थः। चिंताविषयं विविंचन्संदेहलाघवं व्याचष्टे अवेति। वस्तु
मद्गणादिशब्दानां यातः सवनादिशब्दसामानाधिकरण्यस्यानैन्द्राधिकरणेऽयुक्तत्वाद्यथियमाणस्य सवनकृत्यर्थ
त्वसूचनार्थत्वमुक्तोक्तिः। सोत्र लिंगशब्दव्याख्यार्थं किं प्रापमित्यादिप्रयुज्यंत इत्यंतस्सर्वपक्षलाघवस्य व्याख्यासमित्या। ५९

ध्याख्यातानामाख्यातांतरार्थविशेषणीभूतस्वार्थवाचित्वहेतुत्वेनेख्यक्रमाशंक्यतद्धिस्कृतमित्यादिनाथवक्ष्यमाणंचोदि
तस्काशनार्थत्वायोगलक्षणहेतूपजीवनेनोपपादयति तत्रैतितद्धीतिनाथवक्ष्यमाणहेतूपजीवनार्थंलक्षस्यत्वुक्तं।प्र
योजनंचेति वक्ष्यमाणहेतूपजीवनायाद्यतेत्युक्तं।प्रकृतासर्वसाधनत्वेनानुगतानामेवमंत्राणां लिंगविनियोगस्यसाम
न्याच्यसापेक्षत्वयुक्तत्वादनेनस्थितत्वाद्ग्रहणादौचावोदितत्वादर्थात्तेपस्यचलौकिकसाधनत्वमानेणोपपन्नेरसर्वसाधनत्व
गा रहितेद्वारविनियुज्यमानानांमसर्वसाधनत्वस्याघातापत्तेरस्त्वावादितमधासंबोदितालिधानामित्यनेनन्यायेनसध्यासमि
त्यादीनामपिचोदितपक्षविशेषणीभूतग्रहणाद्यभिधानद्वारात्कालिधानार्थत्वावगमाद्गृह्णाहीत्यादौलक्षयामीत्यंतेवल
त्तसंकीर्त्तनात्तत्संदर्शेग्रहीतत्वेनैतेषामपिपदानांलक्षव्यतिरिक्तार्थपरत्वायोगाद्यथादेवस्यत्वेतिमंत्रस्यचोदितनिर्वाप
लिधानार्थत्वात्सवित्रादिपदस्याचोदितार्थत्वेनेहापामाडुक्तायांकथंतत्रचोदितार्थानांसवित्रादिपदानांप्रयोगइत्याशंक्य
ततस्तेनसवित्रादयःप्राशास्त्येनवक्तव्याइत्यनेनकारणेनसवित्रादीनांवचनमितिनाल्लिकिंतुनिर्वापक्रतत्पर्यंसवित्रादिपदं
प्रयुज्यतेनिनवमेवक्ष्यतेतथाग्रहणादीनांलक्षविशेषणत्वेनालिधानात्सध्यासमित्यादीनामेकलक्षणत्वप्रधानत्वतायां

नांतरत्वयाम्निपदैकवाक्यत्वाद्वन्त्व एव विनियोग इत्याशयः। लिंगेन वाक्यबाधादेकवाक्यत्वायोगशंकार्थं न क्रियादिनार्थं
एकोपक्रमेणोपसंहारत्वेनैकवाक्यत्वोपगमनसामर्थ्यरूपाल्लिंगादेकवाक्यत्वावगतेः। तत्रेहीत्यस्यार्थे हिशब्दयोगादेहि
वसवित्येकवाक्यत्वेन ग्रहणार्थत्वात्स्फुटमेवाराध्येन तत्परित्यागाद्योगादवुक्तशंकायोपपादयितुमाह यद्युक्तमिति। तत्र
णेपिशब्दाद्ग्रहणेपुएपनेरेकोपक्रमोपसंहारत्वाविवानिश्चयाच्छंकाप्युक्ता। वस्तुतस्तु प्रधानस्तत्तत्रार्थत्वसंबंधेपणश्तद
50 हणार्थत्वायोगादेहिवससवित्यादेर्ग्रहणार्थत्वं तावत्कृतो नेत्यर्थः। सर्वे हिंसार्थत्वस्मरणाद्ग्रहणार्थतामयुक्तेत्याशंक्याह
यद्यपीति यत्र क्वापि विनियुज्यमानस्य वाहो। सामर्थ्याद्ग्रहणस्यावांतरव्यापारत्वावगतेः पातेरेव ग्रहणेन्नावसाशास्यापि
ति पादपर्यंतिवाऽज्यादेशाद्वाहोरसाधारणत्वोपपत्तेर्बीज तंतु संतानेस्मृतात्रिर्वपतेरिवावाऽऽकारणकत्वाद्विना तावन्निमित्तक
यालक्षणयास्माद्धातोर्ग्रहणप्रतीतिरित्याशयः। क्रियावाचित्वमाख्यातं मेकैकोर्थो निदर्शितः। प्रयोगतोनुगंतव्या अनेका
र्था हि धातवः इति स्मृतेर्वहिद्वप्रयोगात्कृत्येव ग्रहणार्थता वसीयत इत्याह अस्मिवेति। अत्रायत्नयाद्वयहार्थग्रहणे हृद्वप्रयो
गाद्धिंसाया वस्मृतेरुक्तयाद्वयहार्थग्रहणक्तताहिंसावाचित्वावगतेः सेधेर्लक्षणार्थतेत्यनयासमाधत्ते ग्रहणेति। इच्च्व ५०

समितिभाष्यावयवंव्याचष्टेनथेति। बह्विङोलाक्षणार्थत्वस्मरणादवेक्षणार्थतानयुक्तेत्याशंक्याहयद्यपीति। अज्ञाप्यक्रम
याद्वयहार्थंसाधणक्रतप्रकाशनवाविद्याक्यतेईक्षणयाप्रकाशनार्थतेत्याशयः। प्रयोगदर्शनार्थेहृचक्षः। शहृद्व्याचक्ष
णेभंत्रावयवंव्योजयतिनेनेति। बह्विङः ख्याञादेशस्मरणान्नस्यचानिष्टज्ञात्त्व्यैषमितिरूपासिद्धिमाशंक्याह। अव
ख्येयमिति। छंदसिहष्ठातुविधिर्वेनेहख्येयमित्यघसंख्यानकरणात्सिद्धङलंलेरीतिसिद्धिकरणाश्नयणाद्वरूपसिद्धि
रित्याशयः। हिनोतेर्गतौस्मरणादुपसंहारेचनामेरथस्याजृतिनिषेधादुपसंहारेचनासेरथपर्य्यालोचनेनेंद्रियगणा क्रमेप
त्वधीकरणनिषेध चक्रूत्वां साच्छेनाख्य हृदं हृदयास्यसमशीर्षच्छिडसंवारसिस्वशाणाख्यसक्षुर्घपस्थानोनेनारपिम
न्द्वेइंगावगातिमात्रार्थत्वश्रतीतेश्चसम्यगज्ञरणार्थतानयुक्तेत्याशंक्यहिनोतेः प्रीणनेप्रयोगाजृतिवक्षहृद्यावपिस्मृतेर्ह
र्दनरूपधीणार्थत्वाविरोधात्प्रीणनाथस्यादगत्योख्वसच्युज्ञरणहेतुकत्वात्क्षपणयासम्यग्ज्ञरणार्थताखुपपादयितुमा
हहिवेति। शंकोपसहारार्थंतदितिलाक्षणाचष्टेतस्मादिति। अध्यानिचाख्येति। भाष्यावयवेनलक्षाउवाकावयवक्षूतानाम
हीत्यादिपदानांलक्षणविशेषणं। श्तस्यार्थवाविवोक्यालिंगविरोधात्तावस्योक्तस्याज्ञानाद्धकात्केतेनिमवातत्मारणी

वातूपृथक्प्रकाश्यत्वं नास्तीत्यत्रिपरिहारार्थमुक्तमिति पाठं व्याचष्टे तेनेति। वर्तमानत्वोक्तिस्तु चितस्य विधेयत्वात्

नपरिहारार्थमुक्तमिति साष्टं व्याचष्टे तदिति। ग्रहणावेक्षणयोः प्राग्वर्तमानत्वेन सम्यग्ज्ञरणस्यचोर्द्ध्ववर्तमानत्वेनावि
शेषणेनेत्यर्थः। विशेषणविशेष्यत्वेपीडोपद्धानेज्ञानेक्षणवत्पृथक्प्रकाशनोपपत्तेर्भिन्नार्थत्वाविरोधमाहेति। साष्टे
णाशंक्योपद्धानवद्ग्रहणादीनां पृथग्विधेयत्वावश्यंतद्धेतेन परामर्शाद्ग्रहणादीनां विधेयत्वेन कारणेनाविशिष्टलक्षणप्र
काशनेर्थाद्विशेषणत्वं तस्य ग्रहणादेरात्तेश्चत्वात्पृथक्प्रकाश्यत्वासत्त्वेनैवकार्थोपपत्तेर्लिंगविरोधस्तावद्स्त्यर्थः। पृथ
ग्विधेयत्वेपि पृथक्प्रयत्नापाद्यत्वात्पृथक्प्रकाश्यत्वं लक्षणस्य बाधान्योपपत्तेर्लक्षणया विशेषणत्वेन ग्रहणादिप्रकाशन
नयुक्तमित्याशंकाशयविवरणार्थं नैवमिति साष्टं व्याचष्टे। यद्यपि चेति। पृथक्प्रयत्नापाद्यत्वेप्यविहितत्वेन विधेकसम
धिगम्यात्सर्वसाधनद्वायोगादसर्वसाधनीकृतमंत्रादिरूपवैदिकोपायद्वारत्वायोगाद्ग्रहणादेः प्राप्तेरपि प्रकाशनं न
युक्तमितिपरिहाराशयं विवरणार्थत्वेन भक्षणस्येव समुच्चरितेन शब्देनाहिरैंद्रवायवस्य सत्त्वयतीत्यादिना विधेयत्वा
ख्यानान्मंत्रप्रकाश्यत्वं नाविहितस्य ग्रहणादेरित्येवं सोत्र समाख्यानशब्दव्याख्यार्थत्रश्रेत्यादिनत्तैः प्रयोजनमित्यत
साष्टं व्याचष्टे तथापीति। लिंगाद्भिन्नार्थत्वावगतेरेकवाक्यत्वायोगशंकापरिहाराशयविवरणार्थत्वेनाप्यस्येवस्त्रचाव ५१

यवस्य समीहितत्वरूपेण प्रयोजनत्वेन तल्लक्षणरूपस्यैकस्यैवार्थस्याख्यानान्न लिंगविरोध इत्येवं व्याख्यार्थं प्रयोजनंत्वे
त्ति भाष्यमर्थैकत्वादेकं वाक्यमित्यर्थः शब्दस्य प्रयोजनवाचित्वाशयमिति प्रश्नयित्वमाह तादिति न किंचिदित्यनेन वत्ते
रिति भाष्यावयवव्याख्यायां पाउद्दिष्टकृतस्य प्रयोजनंवेत्यनंतरभाष्यस्य तच्छब्देन परामर्शादेतेन तद्भाष्येण यदुक्तं तन्निवा
पेविस्तरेणोपपादितमित्यर्थः तस्मादिति भाष्यं लिंगलिंगविरोधाशंकापरिहाराय संहारार्थत्वेन व्याख्यातुमाह तस्मादिति
सामान्यात्त्वयार्थमपेक्षितया समाख्ययोक्तेत्वयावात्तु वाक्यस्य लक्षणार्थत्वाल्लैंगिकविलक्ष्यविनियोगायोगोक्त्यर्थं वे
नान्यथास्यैवावयवस्य व्याख्यार्थं समाख्यामन्वेति भाष्यं व्याचष्टे तथा चेति । अथ प्रयादि समाख्यावलत्वाद्वाक्यसमाख्या
यावैदिकत्वालावेनाविनियोजकत्वायोगाल्लिंगस्य तदपेक्षा नास्तीत्याशंकार्थं नवित्ति भाष्यमवतारण्य व्याचष्टे तनेति
मिथ्यात्वाशयेयं शंकासमाख्याया विनियोजकत्वायोगाशया वेति विकल्प्या वैदिकत्वेयनादित्वेन पुरुषनिबंधनदोषा
भावान्मिथ्यात्वं तावन्नास्तीति परिहारार्थं यद्यपीति भाष्यं व्याचष्टे तादिति । श्रोकव्याचष्टे यथैवेति । द्वंधपरंपरादोषापत्ति
शंकानिरासाय साक्षाद्विनियोगविषयसामान्यनिरासेन वाचावाचकत्वविषयसामान्यस्वनार्थत्वेन सार्थ्यनित्या

ख्यातुं नवेत्युक्तं। श्रुतीङ्गितैरर्थैधपरंपराध्यानववाध्यनावकरावेतीङ्गियस्याशयः तत्राद्यवाकसमाख्यानस्येतदर्थ
वाकवाचिवाक्यसायेश्रुतीङ्गियेविनियोगेप्रामाण्यंनसंभवतीतिद्वितीयकल्पंकिमितिराघेणाशंक्यसाक्षाद्विनियोग
प्रामाण्याद्योगोपक्रमादिपरंपराद्वाराविनियोजकश्रुतिकल्पनाद्वारावैदिकसमाख्यावद्विनियोगप्रामाण्योपपत्तु
त्यर्थमेतदित्याद्युक्तमास्यामह इत्यंतेनाथमवैदिकाः समाख्यायावेदार्थावधारणवेलायामबुद्धिस्थत्वाद्विनियोज
कत्वायोगशंकानिरासपूर्वंव्याचष्टे अत इति। सन्निधेरुच्चारणं वा विना समभिव्याहारशब्देनोच्चारणार्हशब्दसन्निधातिधा
नाद्देशाधिष्ठानत्वाच्च सन्निधेरवश्यवक्तव्यत्वन्न वस्तूक्तनार्थं वित्यमाणेत्युक्तं। षष्ठीसमासात्संबंधमात्रावगमेप्यंगांगिरूप
संबंधोपादकवाक्यकल्पनेन तत्रेत्यनेन सूचितेत्युपपादनार्थं तत्र स्यांगविषयाद्यवाक्यस्यांगिविषयापेक्षा स्वतोपि
हीत्यनेनोक्ता। श्रुतिः सिद्धवतीत्यन्वयाविशेषावगमेपि सामर्थ्यं विना निर्वाहायोगात्तत्कल्पनाश्रितेवेत्यनेनोक्ता। सत्य
स्वगतिः कथमित्याशंक्य संबंधसामान्यसन्निधिलक्षणक्रमाऽन्ययापेक्षालक्षणप्रकरणकल्पनद्वारांगांगित्वविशेष
रूपसंबंधोऽपि सामर्थ्ये गांगित्वाविष्कृत्यतावैंगांगित्वायोगमाशंक्यसशब्देनश्रुतिः सूचिता। विनियोजकश्रुत्याद्य

माने ऽपि विध्येकवाक्यत्वे विधिश्रुतिं विनांगत्वायोगमाहेति भाष्येणाशंक्य समाख्यावगतांगत्वस्यानुवाकस्यश्योगवा
क्याद्विध्येकार्थमजेति भाष्यं व्याचष्टे तथेति । तस्मादिति पूर्वपक्षोपसंहारभाष्यं व्याचष्टे तेनेति । तस्य रूपोपदेशस्यामप
कार्येऽर्थस्य चोदितत्वात् ॥ ॥ लिंगविनियोगाधिकारादुपदेशस्य वस्मप्रज्ञरणे ऽपि क्लेशोपपाद्यत्वाडुपदेशग्रहणस्याभ्यूह्य
यमावार्थश्रुतीतेरहिताद्वाक्यस्यावयवानां केषांचिल्लिंगेन लक्षणादपकर्ष इत्येवं तस्य रूपादपकर्ष इत्येतावत्सूत्रावयवस्य
व्याख्यानार्थं रूपादित्यादि न लक्षणेत्यंतं भाष्यं व्याख्यातुमाह पूर्वेति चोदनेति कीदृक्त्वपरिचोदनो को मार्ग इत्येतावत्सूत्राव
यवव्याख्यानार्थं रूपादित्यादि पक्षायां मंत्रस्य श्रौतार्थत्यागायोगात्कृतिहन्नेरुच्यात्यवाइहणादेशत्वप्रार्थत्वेन मंत्रग्रहण
शक्तेः स्वातिधानमंतरव्यापारीकृत्य लक्षणार्थत्वांगीकर्तव्यतापेक्षते स्वपाशाद्यपसानुव्यात्यवादित्यक्तं छात्रेन नस्ता
शक्तेः स्वातिधानमवांतरव्यापारीकृत्य लक्षणार्थत्वांगीकर्तव्यतापेक्षते स्वपाशाद्यपसानुव्यात्यवादित्यक्तं छात्रेन नस्ता
द्यस्योदाहरणशाद्वः श्रुतिशाक्षाद्यरूपार्थद्वयाशयतयावाक्याद्विशेषणत्वरूपार्थद्वयाशयतया वलक्षणाशद्वोद्योत्या
तोभवति क्लृत्स्नस्यैकवाक्यत्वात्क्षणे विनियोगस्य पूर्वपक्षितस्यानिरासार्थं सूत्यार्थतावेति भाष्यावयवं व्याख्यातुं यह
णादिप्रकाशनार्हेण रूपशद्वोक्ते न सामर्थ्यात्मके न लिंगेन वाक्यबाधो न क्यर्थो हार्थवाच्ययस्तु स्मारतीया कवतिप्रत्ययां

तद्ग्रहणादिवद्बहुदुक्तोयंग्रंथः। सर्वथैतानि सत्रूपणविशेषणानीति तात्पर्योक्तं लिंगाविरोधं द्रूषयित्नुमरुआघते नश्चिति। एव
मपीति पश्चिोदनातात्पर्योक्तं दूषणमाह सत्यमिति। ग्रहणाद्यसिधानसामर्थ्यरूपश्रुत्यन्ताल्लिंगापेक्षयैकवाक्यताकल्पनल
णाद्वारत्नयपदैकवाक्यतोपगमनसामर्थ्यलिंगस्य पूर्वपक्षोक्तस्य श्रुतिकल्पनविप्रकर्षाद्दौर्बल्यमित्यर्थः। एवं वश्रुत्यन्ताल्लि
ग विनियोज्येन मंडादिना सत्रस्यावरुद्धत्वादेहि वसवित्यादीनां वश्रुत्यन्ताल्लिंगाद्ग्रहणादिषु प्रवृत्तेरसंबंधप्रदीपकमिदं इत्याह ते
नेति। यद्यपि ग्रहणादय इत्यसोन्यसमाख्यानोक्तिश्चयमध्याख्यार्थस्तात्पर्योक्तार्थाद्धुराघर्णं युद्ध्यत इति तात्पर्यं व्याख्येनवृत्ति। स
त्यरिहारार्थत्वेनार्थस्य वोदितत्वादितिस्वाद्यवयवसमरस्ववि ध्य यथानुपपत्तिकल्पित न विधिनैवहि वसवित्यादितात्पर्यं वाकार्थ
स्य ग्रहणादेश्चोदितत्वादसर्वसाधनत्वेनासर्वसाधनीश्रुतमंत्रप्रतिहारत्वोपपत्तेर्मंत्रप्रकाशपतापुक्तेत्येवं व्याख्याश्रमश्रेति ता
त्पर्यमर्थप्राप्तानामस्मृतानामपि वावृत्त सिद्धत्वात्सिद्धेः स्मारकानपेक्षा। सर्वसाधनत्वाता वेनवा ऽसर्वसाधनीश्रुतमंत्रप्रतिहारत्वायो
गादिति विकल्पाद्यकल्पनिरासार्थोसावितिताप्तावयवः सम्यञ्जरणस्याङ्गनिष्पादितत्वमाशंक्य विनाडीगति प्रतिबंधफ
लार्जवावस्थानमनः प्रणिधानादिप्रयत्नापाद्यत्वोक्त्यर्थश्चोदितानीत्यादिर्द्वितीयकल्पस्य निरासार्थो द्वेन सत्रावयवत्वा ५३

53

ख्यार्थ इत्येवं व्याख्यातुमाह कार्यमिति । गौणशीर्णेन्द्रियगणवितथीकरणप्राणारख्यसमस्तर्पस्थाननास्यथस्मादगम
नरूपानेकार्थहेतुत्वात्समभ्युद्धरणस्य व्रतवदपवर्ग्यवमनविरेकनिमित्तप्रायश्चित्तनामानरूपस्य भ्रूवाक्यबोधितत्वाल्लिं
प्रायश्चित्तविधेर्लिङ्गमावत्वाद्देवकेतिमन्त्रासत्त्वस्योदरस्थापनरूपधर्तिपत्त्यर्थत्वात्समभ्युद्धरणं चाविनोदे सिद्धत्वयोग
दन्तविधेः प्रायश्चित्तविधेर्लिङ्गमाचक्षाणा शयं पुरस्तात्सूर्यं चमैन्द्रवायवं लक्षयति पुरस्तात्पंचं मैत्रावरुणं लक्षयति सर्वतः
परिहारमाश्विनं लक्षयतीत्यादिलक्षणविधिनिरपर्यवसानात्सामान्यशास्त्रैर्थस्तोत्रीनामिव समभ्युद्धरणस्य बोधितत्वाल्लिध
फ.ल्प नमर्थप्राप्तानीत्यनुविहितलक्षणायुथा उपपादितविध्यन्तरबोधितवाशयमित्येवं व्याख्यातं लक्षं तत्प्रयोजनं चेति सो
त्रसमाख्यानोक्तिहितीयथा ख्यार्थसाध्या ज्ञातार्थनिरासार्थविनाश्यात्स्यापोक्ति व्याख्यार्थरूपं चैषामिति साध्यमेहीत्यादि
पदानां लक्षयामि पदैकवाक्यता नपेक्षरूपग्रहणादि प्रकाशन एव समर्थमित्येवमेकवाक्यतोपगमनसामर्थ्यात्मकलिं
गस्याभिधानसामर्थ्यात्मकलिङ्गापेक्षयाकृतिविप्रकर्षेऽपि सामान्यान्वयाथोपेक्षितसमाख्यानुसारित्वाद्भूतिकल्पक
त्वमुक्तं सामान्यान्वयरहितत्वान्वितस्य नयुक्तमिति न वितिसाध्येणाशक्यलक्षणस्याकृतार्थग्रहणादिवैशिष्ट्यप्रका

54

श्रनेकान्तेरचोदितत्वेनादृष्टार्थत्वापत्तेः दृष्टसंतत्वेवादृष्टार्थत्वायोगादेकवाक्यतोपगमनसामर्थ्यस्याकृतिकल्पकत्वा
नुपपत्तेः छ्रिन्यायेन च कृत्स्नस्य लक्षणार्थत्वालावेपि लक्षणावृत्ताकसमाख्यापपत्तेर्ग्रहणाद्यभिधानसामर्थ्यस्यापि समाख्या
विरोधासावाकृतिकल्पकताद्युक्तेत्येवं निरासार्थत्वेन ग्रहणाद्यर्थस्यैवाद्युष्टेयत्वेन प्रकाशपतयापेक्षितत्वात्तदर्थत्वे दृष्टा
र्थत्वोपपत्तिरनपेक्षितत्वात्तस्कृत्यर्थत्वे त्वसत्यदृष्टार्थत्वापत्तिरित्येवमर्थस्य चोदितत्वादित्यस्याहत्याख्यातश्यान्तरार्थत्वादमि
त्यादिनासाध्यत्वस्य स्पष्टत्वात्तद्व्याख्यातं त्रयरत्नत्वावाके केषांचिदवयवानां सत्वेणोदिश्य कर्षइत्येवमधिकरणार्थोपसंहारार्थं
तस्मादित्तिनासाध्यंद्व्यावष्टे यत इति। मंत्रविधायिवाक्यासावाद्ग्रहणादिविषयत्वेनोपदेशोक्तिर्व्याख्याता। हिवेति मंत्रस्य स
म्यग्स्मरणप्रकाशनशक्तिरिति स्पष्टत्वमात्रालंबनाशैद्योपदेशोक्तिः छ्रर्थस्यैवेत्येवकारेण लक्षणकृतेश्चोदितशब्दोक्ता
पेक्षाव्यावर्तिता। येन कारणेन ग्रहणाद्यर्थस्य पृथक्कृतयत्नापाद्यत्वेनानुष्ठेयत्वात्प्रकाशनापेक्षार्थस्य चोदितत्वादिति थर
सूत्रावयवेनोक्तातेन कारणेन ग्रहणादेः प्रत्यक्षोपदेशाउदाहरणेपि लक्षणविधानपक्षाउपपत्तिकल्पविधिभिर्ग्रहणाद्युपदे
शासंभवान्नदोषइत्याह तेनेति। सम्यग्स्मरणस्य चसौमेडंचरुंनिर्वपेद्धा मा कंसोमवामिनइतिवमनेप्रायश्चित्ताम्नानादि ५४

कर्म

रेकेपि क्वचित्प्रायश्चित्तामाम्नानात्तदर्थं श्रोत्रउपपत्त्यापि विधिकल्पनसंभवात्स एष एवोपदेश इत्याह सम्प्रजरणं चिति। दार्ढ्यो
श्याप्रत्यक्षोक्तिः॥ टी॥ यूणा। विधानान्मंत्रादिरेकमंत्रः स्यात्तयोरेकार्थसंयोगात्॥ ॥यथार्थनिष्कृष्टमंत्रोदाहरणसाध्यं स्पष्टं ने
वाकवदेवेति सर्वाधिकरणवार्तिके नैवार्थोद्धारत्या तद्वात्संदेह साध्यं न साक्षाद्वादश्याख्याय किं नाव दिति सर्वपक्षसाध्यं पुरो
डाशादिलक्षणवत्सोमलक्षणस्यापि द्रव्यप्रतिपत्त्यर्थत्वेव कार्यानुष्ठानसामर्थ्याधानरूपसंस्कारार्थत्वं स्यापि सं
वाक्षर्ध्ययति नात्रानुष्ठानसमर्थस्य लक्षणया प्रोत्साहनाद्यानुष्ठेयस्यापि स्वर्गादिप्रकाशस्य सत्त्वोपपत्ता वृद्धिधानसाम
र्थ्यात्मकलिंगाविरोधिनैकवाक्यत्वोपगमनसामर्थ्यस्य लक्षणयाप्रोत्साहात्मकेन लिंगेन मंत्रादेर्लक्षणे विनियोगायोगात्स्य
कं तन्नेत्येवमाशयत्वेन व्याख्यानुमाह यूहणादिवदेवेति। पूर्ववादत्वेनानंतरसंगतिसूचनार्थाह दृष्टांतोक्तिः। सोमलक्षणस्या
नुषंगिकलक्षयितव्यसंस्कारार्थत्वकल्पनेपि लक्षयितृसंस्कारस्य स्वर्गवित्फलवासावेनोत्साहनार्थप्रकाशनानर्हत्वात्तु
पपत्तेरसिधानसामर्थ्यात्तर्पयते सुतल्लक्षणार्थत्वहेत्वलावात्तष्टेस्या ल्पं लक्षयतीति यावद्वृष्टिनिषेधेन नाशंकनीया पाद
नयानुष्ठेयत्वात्प्रकाशनार्हत्वानुपपत्तेरसिधानसामर्थ्यात्मकस्य लिंगस्यानर्थक्यापत्त्या। विनियोजकत्वात्तदविरो

55

प

द्विनैकवाक्यतोपगमनसामर्थ्यात्मकेन लिंगेन मंद्रादेर्लक्षणे विनियोगात्स्थितं तत्र चमसगृण्णा ग्रहो मंत्रसिरागयोरेकत्वमिष्ठि
लकलक्षणारूपार्थसंयोगावगतिमल्लिणणे त्वेनत्वस्य सिधानावगमान्मंद्रादिरेक एव मंत्र इत्येवं स्त्रयाख्यार्थमेवमि
त्यादिसाध्यंतात्पर्यतो व्याचष्टे इतीति श्लोकं व्याचष्टे ग्रहणादीनीति तयोरेकार्थसंयोगादिति स्त्रावयवव्याख्यार्थं सन्नया
मिवाकृतस्यतीत्यादिसाध्यशेषं संक्षेपतो व्याचष्टे तस्मादिति लोटः प्राप्तकालार्थत्वे शार्थं नार्थत्वेवातस्यतीतोतत्दर्थं ल
क्षयामीत्येवमेकवाक्यतोपपादनार्थं तर्प्पणक्रियार्थायां लक्षणक्रियायाश्च पपदस्थतायां स्मृतातस्थतीत्यादिसाध्यशे
नि षमविष्टंत्याख्यातृहिसक्तिलाघ्येप्रयुक्ता॥ ॥लिंगविशेषनिर्देशात्समानविधानेष्वैन्द्राणाममंत्रत्वं॥ ॥मंद्रादिर्मंत्रोलि
गेन लक्षणे विनियुज्यत इत्युक्ते प्रसंगात्किमैंद्र सोमलक्षणेष्वेव विनियुज्यते सर्वेष्वा सोमरलक्षणेषु विनितार्थमापादस
मासैरेकमधिकरणं संदेहहेतुश्चैंद्रपीतशब्दः किमिंद्रेणपीत इति तृतीयासमासत्वात्सोमवाची किंवेंद्रेण सोमपीतमास्मि
न्निति बहुव्रीहित्वात्सवनवाचीति संदेहः तत्र लिंगविशेषनिर्देशादनैन्द्राणाममंत्रत्वमित्येतावत्सूत्रमन्यपदार्थप्राधान्याद्बहु ५५
व्रीह्यपेक्षया स्वपदार्थप्राधान्यात्तत्पुरुषस्य बलीयस्त्वमिति तेर्विशेषतस्त्वसामान्याधिकरण्येन बहुव्रीहित्वायोगादिंद्रपीत

श्चैत्यैंद्रलिंगनिर्देशादनैंद्रसोमलक्षणानां लिंगविनियोज्यमंत्राविषयत्वेनेत्येवं पूर्वपक्षार्थः समानविधानेष्वैंद्राणाम
मंत्रत्वमित्येतावत्त्वाद्धद्देकदेशमैंद्राणामनैंद्राणां च प्रदानानां धर्म्म्यात्येकज्योतिष्टोमावयवत्वेन समानविधानत्वात्प्र
कृतिविकारत्वाभावान्नोहाद्योगादनैंद्रसोमभक्षणानां मंत्रशून्यतेत्येवं पूर्वपक्षप्रयोजनोक्त्यर्थमिति सर्वं श्रवयितुमाह
इंद्रपीतस्येति। यथादेवतं वा तत्प्रकृतिवदिहि दर्शयति॥ ॥लिंगेन मंत्रस्यानैंद्रसोमलक्षणे विनियोगाभावेपीद्रायत्वा वसुम
ते रुद्रवन्तमिद्रतीद्रलिंगेनैव मंत्रेण सोमग्रहणादिंद्राय त्वा वसुमते मिनोमीतीद्रलिंगेनैव सोममानादिद्याग्नीनां चैवर्णिक
विषयत्वं नियमवन्मंत्रलिंगाद्वाय्वग्नीषोमीयस्य च भागत्वनियमवत्सोमस्य मानग्रहणयोरिंद्रलिंगमंत्रनिर्देशादैंद्राणामेव प्र
दानानामौपदेशिकधर्म्मत्वावगतेः सोमेन यजेतेत्यस्यापि मंत्रालोचनयैंद्रेण सोमेन यजेतेत्येवमर्थत्वावगतेः कर्म्मैक्येपि च
त्यासानां भेदात्सस्थावत्प्रकृतिविकारत्वाभावोपपत्तेः सर्वेषां प्रदानानां समानविधानत्वाभावादनैंद्रसोमलक्षणानां यथा
देवतं मंत्रवत्त्वेनेत्येवं पूर्वपक्षप्रयोजनाद्धेपार्थत्वेनेतत्सूत्रं व्याख्यातुमाह अनैंद्रेष्वपीति। प्रयोगोक्त्या पूर्वपक्षप्रयोजनोक्त्यर्थं पूर्व
पक्षावयवोक्तामत्रकत्वनिरासार्थत्वेन वा शङ्को व्याख्याता। कर्म्मैक्यात्प्रकृतिविकृतित्वादित्यनेनानैंद्राणां प्रतियोगित्वेनो

नियमाच्चैत्रसाध्यानां क्रतूनां त्रैवर्णिकविषयत्वप

पस्थापि तैंद्रप्रकृतित्वं वदता तत्प्रकृतित्वं हीति सूत्रावयवो व्याख्यातः कस्मैक्यात्प्रकृतिविकृतित्वायोगमाशंक्या
ह समानेपिहीति । आग्नैंद्राणां विकृतित्वे प्रकृतिः केत्यपेक्षायामाह । क्रत्वेति । लिंगविशेषनिर्देशादिति सर्वस्य सूत्रावयवमनु
ष्ठज्यैंद्राणां प्रकृतित्वोपपादकत्वेन हेतुं प्रश्नपूर्वं व्याख्यातुमाह कथमिति । कथं गुणश्रुतमंत्रानुरोधेन प्रधानश्रुतप्रदानव्य
वस्था इत्याशंक्याह तत्वतिहीति । प्रकृतिविकारस्तावत्तु पसंहरति तेनेति । प्रकृतिविकृतित्वोपपादनस्योहोपयोगमुपसंह
तितत्त्वेति तत्प्रकृतित्वं हि दर्शयतीत्याह तेनैकदेशस्सूत्रावयवोक्तं लिंगदर्शनं व्याख्यातं तथा चेति । अग्निष्टोमांतानां प्रदानानां
समानविधानत्वेपि संस्थानां विकारत्वादूहानुवादस्योपपत्तेः प्रकृतिविकारत्वादूहानुवादस्योपपत्तेर्मीवालिंगत्वायोगमाशं
क्य परमतेन तावत्परिहरति संस्थानां चेति । स्वमतेन संस्थानां विकारत्वेप्यूहानुवादस्य लिंगत्वोपपत्तिं शंकापूर्वमाह नवि
ति । अग्निष्टोमांतप्रदानसामानाविध्येसति संस्थानां विकारत्वेपि यथा प्रकृताव अग्निष्टोमसंस्थायां सर्वेषां वै कर्मं ... स्यादि
ति सिद्धांतन्यायेनाह हित प्रयोगस्तथा विकृतावपि षोडशिन्यातिरात्रे चादित्य वरुणस्य तृतीयसवनस्य जगतीछंदसः पि
त्पीतस्येत्यत्र हितप्रयोगसंभवान्नोहानुवादोयुज्येत । ऐंद्रप्रदानानां तु प्रकृतिविकृतित्वे यथा प्रातःसवनीयेष्वैंद्रेषु ५६

56

दानेष्वनूहितस्तथातार्तीयसवनिकेषग्निष्टोमादिषु पिपितृदेवत्येषु प्रदानेष्वनूहितत्वान्योऽश्यन्तिराश्रारघ्ययोस्तार्तीयसवनीय
योरपिपितृदेवत्ययोःप्रदानयोरूहदर्शनंयुक्तमित्यर्थः।पूर्वपक्षेन्यदेवत्यसोममन्त्रणानाममंत्रकत्वेपिसमानविधानकत्वस्या
पूर्वपक्षासिद्धेंतयोरुक्तत्वात् इंद्रलिंगानारसीभूतसोमग्रहणादिमंत्राणामनैंद्रसोमग्रहणादिषु प्रयोगस्तस्याभिमतमात्रे
प्सुमसमानविधित्वेनाप्राप्तिप्रोहशंकार्थसंगतिलालसायेंद्रपीतशब्दस्य सोमविषयत्वात्स्कपगमेनानैंद्रेष्वपितत्त्यमंत्रोहस्य
शंकितत्वाल्लिंगदर्शनोपपत्तिः।समानविधानत्वेप्यनुष्टुप्छंदःशब्दस्य कृत्स्नमंत्रंकरोतीतिकृत्स्नमंत्रेप्यनुष्टुप्छंदःशब्दविधाना
त्पूर्वपक्षश्चायेनवाषोडशिनिपितृदेवत्येपितृपीतशब्दयुक्तःतार्तीयसवनिकस्तत्त्वमंत्रःप्राप्नेरनुष्टुप्छंदःशब्दयुक्तस्तत्त्वमंत्रवि
धानादर्थप्राप्तस्योहस्याधातुनानुवादोत्र विधिरितीत्याशंक्याह विशिष्टेति।जगतीकार्थेषोडशिन्यनुष्टुप्विधीसत्यनुष्टुप्छंदःश
ब्दस्योहितत्वमंत्रत्वसिद्ध्यर्थौविधिरूहानुवादेश्चवसीयतेतत्तदलावानुयन्नमतितदनुष्टुप्छंदसइत्येवस्हविशेषरूपेण
णविशिष्टमनुष्टुप्छंदःपदमपेक्ष्योहाप्यविपरिणामव्यपदेशोनयुज्येतनत्स्वरूपेणविधित्सितमनुष्टुप्छंदःशब्दमपे
क्ष्यातत्तश्चानुष्टुप्छंदःशब्दस्योहत्वेप्रमाणेसावान्त्रद्विधावपूहस्याप्राप्तत्वात्तानुवादोपपत्तिरित्याशयः।इष्टपदेतिपाठेन्वउ

रघु

ष्टुप्छंदःशहस्योहाउवादार्थं नमतीति पदमपेक्ष्य पश्चाद्विधौ सति विपरिणामव्यपदेशो युज्यते तेन उद्विधित्सितमउष्टुप्छंदः
शहमपेक्ष्य पश्चाद्विपरिणामव्यपदेश इत्यर्थः ॥ सर्वपत्तप्रयोजनाक्षेपमुपसंहरति तस्मादिति ॥ ॥ पुनरस्फत्नीतेषु सर्वेषामुप
लक्षणं विशेषत्वात् । उहोक्तेः सर्वपत्तप्रयोजनाक्षेपमात्रार्थत्वेनान्यथा यित्वा इहविशेषचिंतानुयुक्तेत्याशंक्योहद्याजेन पुनरस्फ
त्नीतयागे सर्वशेषसहितस्य पुनरस्फत्नीतस्य सोमस्य विनियोगः पुनरस्फत्नीतमात्रस्य वेति चिंतार्थकत्वा चिंतयोह विशेषचिंतो
पपत्तिसूचनार्थमेवमिति तात्पर्यं व्याचष्टे । एवमिति । सर्वपत्तप्रयोजनाक्षेपः सर्वपत्तान्यानि विवृत्तितः । उहे निरस्ते ताद्विशेषचिंतान
वसरापत्ते मर्थेच्छेचिंतांतरोपपत्तिसूचनायेवकारः । क्वचिंतो क्योहास्यास्थायि चोपित निमित्तेण संसर्गिद्रव्यस्य निष्क्रमसामर्थ्या
त्मकलिंगहेतुकशेषचिंतात्मकत्वात्यादलक्षणसंगतचिंतोपपत्तिः स्वचिंता । पुनरस्फत्नीतो किं व्याचष्टे उत्तेषितिति । पुनरस्फत्नीत
त्वोक्तपपादनार्थं तेषामित्यादिनचेत्यादिश्चोह चिंताविषयत्वोपपादनार्थं तात्पर्यमवतारणपूर्वं व्याचष्टे तेषामिति । ब्रह्मयजमा
नहोत्रुद्गातारो मध्यतःकारिणः । मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्रग्नीध्राच्छावाकानां चमसहोत्रकाणां मध्ये छावाकत्वमसै ५७
त्कृष्टपात्रस्थस्य पुनरस्फत्नीतयागांगत्वं द्रव्यवनिष्कर्षशंकेः पुनरस्फत्नीतमात्रस्येति निष्कर्षसामर्थ्यात् पुनरस्फ

57

त्वयनासावादैनैंद्रत्वेऽपि हविषयत्वाद्युपपत्तेर्नैष्ठावाक्याज्यादर्शिता। ब्राह्मणाद्धंसियाज्यायाश्चैंद्रीत्वेपि क्रियतः सो
मस्य विनियोग इति चिंतोपयोगित्वात्तद्दर्शनं। संसर्गि इत्यत्वेन शेषत्वेदानवगमाद्धेषत्वं चेति। तथाऽयवयवदुक्तमाशंक्य म
उद्या निष्कर्षसंस्तवस्तवनार्थं हश्येते इत्युक्तं। तच्चेति संदेहस्तथाऽपि स्याद्वृष्टे तद्धेति। शेषस्य देवत योपलक्षणे क्रियमाणे तद
पलक्षणार्थत्वे न प्रसिद्धिता पीड्यस्याद्देवताकीर्त्तयितव्या न वेति कीर्त्तिनार्थत्वपृथनत्वा विकरोत्यर्थतयप्रयोगाद्धेपल क
क्षणायेंद्रः कीर्त्तयितव्य इत्येवमुपलक्षयितव्यो वोके र्वा स्येयत्वान्नेंद्रपदोहो नेनोक्तायेनेंद्रपदस्य प्राकृतत्वाद्दिंद्रमि
त्रावरुणसमुदायस्य च देवतात्वात्तावेनेंद्रमित्रावरुणपदद्वंद्वपदस्थाने प्रयोगायोगात्सिद्धांतवचनव्यक्त्ययोगः शं
केयतां द्वयोरुक्तपदानयोः प्रत्येकं तत्त्वमंत्रप्राप्तौ वैंद्रप्रदाने प्रकृतिवाद्विकृते मैत्रावरुणेवामित्रावरुणपदोपेतमंत्रप्र
योजो मिश्रत्वाद्धेषद्वये सहसत्त्वमाणे मंत्रयोरपि सहप्रयोगप्राप्तेः सूक्तवाकवद्देवतापदमात्राहत्येतरपदतंत्रप्रयो
जत्वावसायादिंद्रमित्रावरुणपीतस्येत्येवमुक्तं। अतिक्रांततयागात्वयापत्त्यानपयन्नसंदेहात्संदेहमुपपादयितुमाह
खिंद्रस्यातिक्रांततनाप्रस्थितेक्त्याख्यानायोक्ता। शेषद्वयसद्भावेऽपूर्वपत्त्वायोगात्संदेहायोगमाशंकते कृतश्चेति। स

वदेवताद्वयापनयापनयनसंदेहात्तं देहमुपपादयितुमाह किमिति। वक्ष्यमाणस्य सोमस्य द्वयोर्देवतयोः शेषत्वादि
डस्य मित्रावरुणादीनां वशेषोपलक्षणार्थं कीर्तनाख्यं प्रकथनमित्येवं प्रकथनवादिनः करोतेरर्थे लिड्प्रयोगात्स्पष्ट
र्थं सूत्रं मत्वा निर्दिष्टानार्थत्वमाशङ्क्य व्याचष्टे किमिति॥ ॥अपनयाद्वा सर्वस्याप्युपलक्षणं। सर्वपक्षहेतुः सर्वदेवतापनयासि
द्धेः पात्रस्थस्य स्वरूपमक्षस्य सोमस्येदं हविरासीत्तस्य ग्रहणेन देवतायै श्रावयेत्याश्रावयेति मंत्रेणाश्रावणप्रेषणादस्य श्रौषड्
त्यनेन देवतां प्रत्याश्रावणादस्य च देवतांतरसंचारे मित्रावरुणादिस्य इति ताच्छेण्योक्ते देवतांतरोद्देशेन गृहीतमा
त्रस्यापि ग्रहणादिसंस्तवात्कथं कृत्स्नस्याश्रावणं गम्यत इति पृष्टे प्रदानकालीनत्वादाश्रावणादीनां प्रदानकाले च
संसर्गेऽद्वयत्वेन विवेकाप्रतीतेरित्येवमुपपत्तिसूचनार्थं मित्रावरुणादयस्स देवही जंतेइत्याद्याहारसहितेनोक्तमि
त्येवं ताच्छेण्यं व्याख्यातुमाह आश्रावणेति। होतायक्षन्मित्रावरुणेत्यादि प्रैषांता उच्चनयहणायादिशब्दः॥ प्रदानकाली
नैराश्रावणादिति रिति हेतुगर्भितं विशेषणं अपनीतसर्वदेवतावयस्यापि शेषस्य भक्षसर्वगत्योपलक्षणं सविषयतो
त्याशंकानिरासस्सूचनार्थत्वेन दृष्टांततया ध्यं व्याख्यातुमाह नवेति। सर्वस्येंद्रस्या शेषोपलक्षणार्थत्वेन कीर्तनमि।

त्येवं पूर्वपक्षप्रतिज्ञार्थसूत्रावयवव्याख्यार्थं तस्मादिति साध्यं व्याचष्टे तस्मादिति ॥ अग्रहणाद्वा न पापं स्यात् ॥ सर्व
पक्षहेतुनिरासप्रतिज्ञार्थसूत्रावयवव्याख्यार्थं नवेत्यादिना सावयनीयत इत्यंतं साध्यं व्याचष्टे अथवेति । देवतांतरोद्देशेन
पूर्वस्य सकृद्धुतस्य सोमशेषस्याग्रहणादिति एवमपनयनिरासोपपादनार्थं वाग्रहणादिति सूत्रावयवं व्याख्यातुं पूर्वपक्षस्य
पूर्वशब्दं शेषत्वपार्थांतरपरामर्शार्थं वेमा उपजप्य व्याख्यार्थं सकृदित्यादि साध्यं प्रथमं पूर्वं तात्पर्यतो व्याचष्टे कुत इति यादे
वता उद्दिश्य यद्द्रव्यं हूयते तस्या देवतायास्तद्देवद्रव्यं संबंधी तु केवलया ग्राहक उद्देशेनापि निरूपितानां सवनीयहविषामर्थे नि
र्वापहविषामिंद्रमेव यजतीति देवतांतरावयवश्रवणाद्या उद्दिश्य हूयते तत्संबंधीनि नियमायोगमाशंक्याग्र्यादीन्प्र
तिष्ठवान्प्रादकस्याग्राहक उद्देशेनत्यागः सवनीयहविषामसावेनाग्न्यादीन्प्रतिष्ठवासावात्स्वद्यामिसावलक्षणाध्यादिसं
बंधात्सा वेदुक्तइति वैषम्यसूचनार्थं यां प्रतिष्ठवेन प्रयोजनेन हूयत इत्युक्तं । श्लोकं व्याचष्टे शास्त्रेति । एवमपि पुनरप्यत्नी
तमावं देवतांतरोद्देशेन हूयते न तु पूर्वशेष इति कथमवसीयत इत्याशंक्य सकृद्धुतत्वमसाभिप्रायो न पुनरप्यत्नीतसोम
ग्रहणविधानात्सकृद्धुतसोमशेषस्य ग्रहणाद्वा धारत्वपात्रोपलक्षणमात्रतावसीयते न तु यात्यो ते त्येवं परिहारार्थं वे

नतद्देवताशब्दं व्याचष्टे। इहेति। यद्यपीति। भाष्ये णापनयोपपादनशंकामनुभाष्य ग्रहणकालावगतत्वेदानुसंधानेन प्रदान
कालेसंसृष्टरूपापि बुद्ध्या निष्कृष्टुं शक्यत्वात्तन्नरूपं नीतमात्रं व्याश्रावणादिविषयतावसीयते न तु हत्कृत्स्नस्य पाचक्रुसो
त्येवंपरिहारार्थमुच्यत इत्यादिग्रन्थत इत्यंतं भाष्यं व्याचष्टे। यदा चेति। यथा गृहीतोक्त्या संसृष्टरूपापि ग्रहणकालीनाविवेका
वगमानुसारादेकपात्रगृहीतवायव्यैन्द्रवायवसोमवद्बुद्ध्या निष्कर्षसंभवः स्यादिति। देवतोद्देशपूर्वकद्रव्यत्यागात्मकस्य क
59 त्याप्यायत्वाद्द्रव्यदेवताद्वयस्य तस्य च होमरूपप्रदानकालीनत्वात्तदावसंसृष्टत्वाच्छब्दस्यैव देवतान्तरात्वयोऽवगम्यत
इत्याशंकानिरासार्थं न चाश्रावण इति भाष्यं देवताद्वयस्य प्रदानकालीनतया निराकर्तुमशक्यत्वादयुक्तमाशंक्य यद्देव
तोद्देशेन यद्द्रव्यं त्यज्यते न गृहीतं तस्यैव प्रदानकाले न देवताद्वयमित्येवमर्थत्वेन व्याख्यातुमाह नचेति। प्रदानकाले क
स्य विषयरूपसंकल्पान्तरालाविविक्तरूपं नीतसोमसंकल्पे नैव संसृष्टस्याविवेकग्रहणाशंकाः प्रसंगात्कर्त्तव्यः सोमो
विषयीकरिष्यत इत्याशंक्य यद्देवतासंबद्धत्वेन ग्रहणकाले संकल्पितं तद्देवप्रदानकाले बुद्ध्या निष्कृष्याभ्यां व्याप्यत इत्ये ५९
वंपरिहारार्थं यदिति भाष्यं व्याख्यातुमाह नचेतरेति। यथा गृहीतोक्तिः स्वचित्तो निष्कर्षसंभवोऽपि विवेको ज्ञापक इति। उपाक

मनेकत्वेथैकपदोपादानत्वेन युगपदुपादानात्सहैव पदैर्विषयत्वावगतेः प्रत्ययालोचनभेदानपेक्षतया वाक्यभेदानापाद
कत्वमाहनचेतिकर्तुराख्यातवाच्यत्वाभावेपिलक्षणयोपादानं विवक्षितं। प्रत्ययाहत्विलक्षणएवावाक्यभेदानापत्त्वावधिगो
रवत्वलक्षणवाक्यभेदापत्तिमाशंक्यानेकार्थोपादानेतथात्वसर्वत्रारूपगमेनदोषत्वमाहनचेहशमिति। कथंतर्हि शुद्धदर्थे
विवक्षायांवाक्यभेदोपादानाभावइत्याशंक्यसर्वपदेलोटःप्रसमकालार्थवात्समकालतायाश्चमध्यमपुरुषाक्ष
श्रदर्थविषयत्वावगतेःक्रियायाश्चप्रियत्वात्ययार्थत्वेनप्रत्ययार्थप्रासमकालत्वविशेषणतयातुश्रदर्थविषयत्वावगमात्क्रियायु
श्रदर्थयोःपृथक्त्वंविनाविषयविषयिभावानुपपत्तेःपृथक्त्वात्समकालस्यतुश्रदर्थेनसहतत्वप्रासःकालइतिविषयाविष
यित्वाव्ययविधावेकक्रिययावरहासादनंकर्तुमितिविशेषणविशेष्यत्वाव्ययविध्यावन्यासादयेतिप्रकृतेःशः। किंश्चकल्प्या
तिवाक्यभेदापत्तिरीशोक्तासिद्धान्तेतुवैषार्थवात्त्वैवस्यवनित्यंतुश्रदर्थविषयत्वात्सैवान्यथानुपपद्यावगतत्वात्श्रदर्थे
ष्याउवादात्त्ववाक्यभेदापत्तिरित्याह [redacted] साधेति। समाख्यानादपिप्रैषार्थतावसीयतइत्याह। एवंचेति। सिद्धां
ततुपसंहरतितस्मादिति। अथप्रकृतदर्शमात्र। व्याख्याद्वैविध्यार्थपाठद्वयोःकिंसर्वलिंगदर्शनंव्याचष्टेयदिति। द्विणोत्यर्थं

60

हिंसाकर्म्मेति योक्तस्याश्वयोऽस्पृश्यधारणेत्यस्यायोगेन तद्व्यतिरिक्तस्पृश्यधारयितव्यावगमाद्दर्शपूर्णमासयोश्चाग्नीध्रातिरिक्ता
संस्रवदध्वर्युःकर्तृकाध्वर्युविदाम्नातपदार्थकार्यालाभात्सोमाग्नीदग्नीध्रारितो वा वज्रो ध्रुवं स्रुचीनेत्यर्थद्वयोक्त्यर्थः शाखासदे
नहि विधोपि पावत्स्रग्नीध्रःस्पृश्यधारणमेकान्तेन वदत्वेदेर्वित्तीयदेशे तिर्यंवंस्पृश्यं संस्थाप्रेक्षतीति समानकर्तृकत्ववचनात्स्पृश्य
वतः प्रेषकत्वावगतेरग्नीध्रमेवस्पृश्यवत्त्वात्त्वेककं तावद्दर्शयति दर्शिनाशीर्यंप्रैषार्थकारिणं दर्शयतीति तावदाशङ्क्यावक्तकथ्य
योज्यं। शाखिं विना लिंगच्छाखामाध्यात्स्पृश्यत्वं द्वादश वक्ष्यमाणन्यायद्वयेन शाखिमाह। का वेति॥ ॥ गौणो वा कर्म्मसामान्यात्॥
वाशङ्कोक्तसिद्धान्तमुपपादयितुं तस्य यावदंगगुणविरोधन्यायेनापवदिष्यमाणमपि समसंख्याविरोधविषयत्वाद्भूयो विरोधेन
सिमतमध्यस्य खयार्थं द्वादश वक्ष्यमाणमेव न्यायमाह। गुरुत्वं वेति। साक्षोक्तं पारमार्थिकं न्यायद्यावष्टे योजकस्यवेति। लिंगद
र्शननिरासार्थं वै न स्वं व्याख्यातमाह। वज्रेणेति। आविकालकरणेष्वर्थवत्वात्। मंत्रार्थव्याख्येयत्वमंत्रोच्चारयितृव्यतिरिक्तपु प्र४
रुषगामित्वे सिद्धे तत्प्रसंगात्फलस्य तस्य मंत्रार्थव्याख्यानन्यगामित्वविचारादधिकरणत्रयसंगतिं स्पष्टत्वादनुक्त्वांगाश्रितकाम्य
गुणफलस्य तथा कामो र्थसंयोगादित्यत्रस्वामिगामित्वोक्त्यांगफलस्यापि न्यायसाम्यात्स्वामिगामित्वसिद्धेरेतदधिकरणं सर्वपत्न राम

६०

मंत्रस्योक्तमाशंक्यांगफलत्वात्तावाश्रयेनोपपादयितुमाह यथैवेति। यामिनो वा तदर्थत्वात्ता आंगफलत्वेन सिद्धांतस्तपपादयितुमा
ह मैवेति। नित्यत्वेनाप्राधानस्य फलाव्ययायोगमाशंक्य जातेष्टिवद्वा तु वंगिकफलसाधनत्वेपि नित्यत्वाविरोधमुपचनाथ नित्यो
क्ति:। क्रियासमवेतार्थप्रकाशमात्रात्तु कृत्फलिकिकरणत्वसिद्धेर्मंत्रवर्णिकस्य वर्वेः पुरोडाशादेः समवायकल्पनायोगाश्रयेनपृच्छति
कथमिति। अर्थप्रकाशमात्रात्तु कृत्स्नस्य मंत्रस्य कृत्फलकरणत्वासिद्धेर्मंत्रोक्तस्य फलस्य क्रियानन्वयवादिनां मंत्रस्य क्रियायां प्रा
र्थसमवायाकल्पकतापत्तेश्चेत्याप्याद्यसूक्तवाकाधिकरणोक्तं प्राप्तार्थसमवायकल्पकत्वं तावत्स्मारयति व्यतिरिक्तेति। प्रश
स्यार्थप्रकाशनार्थव्यतिरिक्तक्रियासाधनत्वेनापि विहितो मंत्रः क्रियातत्संबंधार्हं वा किंचित्कारकं क्रियाव्यं कल्पयित्वा प्रका
शयत्यंगत्वं यस्मात्सूक्तवाकाधिकरणन्यायेनयात्तस्मान्नित्यप्रयोगाश्रयं फलमेवेदं कल्प्यमित्यर्थः। एवमपि व्यर्थं विधानाइति
दीपनार्थेनेंधतिनाद्दृष्टात्मत्वारणात्स्याद्वाधानक्रियायास्तत्संबंधिनश्चाग्नेरप्रिशहृन्नस्वशक्याप्रकाशनादर्थः पुरोडाशादेः क्रि
यावयकल्पनानयुक्तेति प्राप्ताशयं निराकर्तुं कृत्स्नमंत्रस्य करणत्वसिद्धौ फलस्यापि क्रियावयकल्पनोपपादनायाह तस्मा
दिहेति। करणत्वेन क्लृप्तिविनियुक्तस्य मंत्रस्यान्यतो सिद्धप्राप्तार्थसमवायकल्पकत्वे सूक्तवाकाधिकरणोक्तेपि सूक्तवाकेनस्य

61

साध्यायाः प्रहरणक्रियायाः साक्षात्प्रकाशनाशक्तेस्तत्प्रकाशकस्य वकस्य विद्यमानत्वात् क्रियान्वयासिद्धेस्तदर्थस्य क्रियान्वय
कल्पनायुक्ता इह त्वाधानक्रियायाः सन्निधिनश्रवणेऽप्रकाशनाकरणत्वासिद्धेर्नाग्न्यर्थसमवायकल्पनायुक्तेति वैषम्याशं
कानिरासार्थं द्व्यर्थसमवायकल्पना ह्युक्तेत्यपौनरुक्त्यमुक्तमुपसंहरति तस्मादिति। अंगस्यापि फलान्वयोपपन्ना वाशी
र्मन्त्राणामर्थयुगपद्यासन क्रियायामायुरादिफलान्वयकल्पकत्वसंभवात्प्रधानफलप्रकाशनार्थत्वास्य परमायोग
माशंक्याह यावदिति। तदर्थवादिनिस्त्वान्वयवंशस्थादेरत्वाधानफलत्वे यात्मासिषादिशह सामर्थ्याद्वैतो सहेतिव्यपदेशसा
मर्थ्यादिवाद्युगामित्वशंकानिरासार्थत्वेन शंकोपन्यासः सर्वव्यपदेशफलस्याद्युगामित्वेपिद्यामिगामित्वानपायाद्यजेतेत्य
स्यादधीतेत्यस्य वात्मनेपदस्य वाधानापत्तेर्वैषम्याशयेन व्याचष्टे आहेति। अथ कस्मादितिशंकासाध्यं करणस्य कर्तृव्यापार
व्याप्यत्वाकरणमन्त्रव्यापारणस्योद्धारणारह्यस्याधान क्रियया सह समानकर्तृकत्वावगतेर्मन्त्रमात्रस्य याजमानत्वशंकायो
गादयुक्तमाशंक्य मन्त्रद्वारा धानस्यैव याजमानत्वशंकार्थत्वेन तावद्व्याचष्टे अथेति। उच्यत इति परिहारसाध्यं मम शब्दश्रवणा
त्मकलिंगात्मनेपदश्रुतिस्यां विरोधे समाख्याया विनियोजकत्वायोगादयुक्तमाशंक्य श्रुतिलिंगाभ्यां विरोधस्य मन्त्राणां याव ग राम

म्यतयायाम्यमानत्वोत्तरकालत्वात्सहकारकालादित्वाद्वा प्रधानस्य मंत्रस्य कल्प्यत्वाभावेन मंत्रान्वयानपेक्षोत्पत्तिकाले फल
न्वयावगतेरविरुद्धया समाख्यया विनियोगोपपत्त्याशये नोपपादयितुमाह नैतदिति । यथाश्रुतसाध्योक्तायाः शंकायाः क
ष्टत्वदर्शनायैतेएवशंकोत्तरसाध्येयथाश्रुतेत्यावक्ष्ये मंत्रमात्रमिति । ममवक्त्वे । इत्यादिनाथ्यंफलाकर्षणशंकोत्तरत्वेन ।
व्याख्यातुं शंकां तावदाह फलमपि तर्हीति । श्रुत्यालिंगबाधात्फलस्याप्यंगमितयाकर्षणायोगं पूर्वोक्तं ताव्रद्राघयित्वा
न्या ख्यापातनिकार्थं स्मारयति आक्षेपेति । आत्मनेपदस्य श्रुतित्वेऽपि सर्वांगप्रधानसाधारण्येन सावकाशत्वात्प्रधानद्वारा वां
गप्रवृत्तेः परोक्षवादात्प्रधाने विनियोगेण शेषमात्राह्लयप्रवृत्तेन लिंगेन बाधं गौणत्वं वाशंक्य सत्यं न्यायाश्रुते मंथिरायाः प्रवृत्तम
यश्रुतिप्रतिबंधकतया नद्भिमितश्रुतिकेन लिंगेन बाधायोगसर्वांगप्रधानफलानां वैकल्प्यात्मनेपदस्य कर्तृगामित्वावि
रोन्यवस्तुरयस्येह वैयर्थ्यापत्तेर्गौण्यापत्तेः रख्याविरोधप्रकारायोगं वदन् मंत्रस्थात्तयेत्मासिवादिनीश्रुतिं कथं व्याख्येयेत्य
पेक्षायां स्वयमध्याहारेण व्याख्यास्तर्व्वयं वैधानात्सत्त्वंपुरुषमेत्यादावध्याहारायोगेनापरितोषाद्राघ्योक्तां गौणत्वेन व्याख्यामा
हतत्वेति । अव्यापकोऽध्याहारपक्षोऽलक्षयमात्रत्वेनोक्तः । सिद्धांतमुपसंहरति तस्मादिति । केचित्कल्पसूत्रकारैः पक्षे बाधान

स्यद्वामिकर्तृकस्येवोक्तत्वात्तद्विषययोगमाशंक्यहेक्षापरिहरतियेविति लिंगदर्शनाद्बहुसंख्यावचेर्षसर्वेति। फलस्यानुष्ठेयत्वाद्भि
तानर्थक्यमाशंक्यफलाशासनस्यमंत्रार्थत्वेनानुसंधेयतयानुष्ठेयत्वाद्विंतार्थत्ववोक्तार्थपक्षोक्तमितिराद्धंमंत्राधिकरणेमंत्रा
र्थानुसंधानस्यानुष्ठेयतयोक्तत्वेनस्पष्टत्वेनव्याख्यातं। कर्मार्थंतु फलंतेषांस्वामिनंप्रत्यर्थवत्वात्। गार्हपत्याहवनीययोर्द्व
रत्वेनांतरासंचरणेपिसंतापनापत्तेस्तादाविकर्थ्यासंतापस्यफलत्वायोगात्क्वालांतरीयासंतापफलतायामंत्रवर्णाकल्पनीय
त्वावगतेस्तस्यचकर्मानौपयिकत्वात्सर्वाधिकरणन्यायेनस्वामिगामित्वस्यैवपक्षंस्पष्टत्वाद्दक्षकाहवनीयप्रत्यग्दक्षदेशाद्दूप्रत्य
गुद्दक्षिणादेशेस्थित्वाक्रत्वाघाराघारणायाहवनीयसमीपदेशेनदक्षिणातिक्रमणेसमंतान्निकृतीनांज्वालानांस्पर्शात्संतापाप
त्तौकर्मविघातयत्नेसत्यतिबंधस्याद्वर्युगतस्यस्वाम्यपेक्षितत्वेनात्मनेपदाविरोधान्ममेत्यात्मालिवादिशब्दसामर्थ्यात्मकेनालिं
गेनातिक्रमणकर्त्रध्वर्युगामित्वसिद्धांतोक्त्याशर्वापवादमाहयस्त्विति। यपदेशात्स्वाद्यपदेशात्फलस्योत्सयगामितायाः
प्रागेवोक्तत्वात्पोनरुक्त्यमाशंक्यब्राह्मणस्याविधायकत्वेनतज्ज्ञताद्युपदेशात्फलस्यात्सयगामित्वेपिमंत्रस्याविधायित्वेपि राम
नतज्ज्ञत्वाद्युपफलस्याक्लेशेनकल्पनीयत्वाद्दृढारद्यद्युत्सफलस्याकर्मार्थत्वेनाध्वर्युगामितयास्वामिनानपेक्षणेनोत्सयगामि ६२

वकल्पनाऽश्राश्याशंकासंभवेनापौनरुक्त्यमाह व्यपदेशादिति। व्यपदेशस्यार्थो यः स्वामि निवृत्तगपत्स्य हन्नेरुत्सयगा। मि
वकल्पनाहेतुतायामंत्रब्राह्मणयोरुक्तत्वात्स्वामिगामित्वानपायेनवाकर्मार्थत्वेपि स्वामिनापेक्षणोपपत्तेरात्मनेपदाद्वि
रोधान्नंत्रेपिकल्पनागौरवक्लेशाभावेन सिद्धांतमाह कल्पनेति। उभयगामिफलाकिंशंक्यारब्धाह्लिंगान्मंत्रस्योभयप्रयो
ज्यत्वं तन्नौ सहेत्यध्वर्युराहेतिवाक्यगताध्वर्युमात्रप्रयोज्यत्ववाधेनशक्यतेश्रयकस्यादिति। लिंगविरोधेनवाक्यस्यबाधाद्यो
ग्यादध्वर्युणैव प्रयोज्य इति नियमोपपत्त्यानिरस्यतियदेति। द्रव्यसंस्कारः प्रकरणविशेषात्सर्वकर्मणां। कः शेषः केन हेतु
नाशेषः कथं वाविनियुज्यते इत्यादीनिवविनियोगकरणानिवक्ष्यंते तेषांचबलवद्बलवत्तेति पंचविधस्याशेषलक्षण
प्रतिज्ञार्थत्वाद्बलाबलविंताशेषवृद्ध्या तत्प्रयुक्तत्वादि त्यत्रबर्हिर्लवणादीनांमंगप्रधानार्थत्वे विहितेवपनादौलोक्रश
पातेनापोदिते महावेद्यांविकीर्षासंयोगस्यानपवादकत्वादनपोदितसिद्धेर्दीक्षादक्षिणेवचनादपोदिते महावेदेरविवाच
निकत्वरूपार्थवादयवादमाशंक्यवचनस्यादेशलक्षणार्थत्वेनानपवादकत्वमुक्तमाह विद्धानेपिदेशलक्षणार्थत्वेतिदिष्टप्रसं
गात्स्वयंकर्तृकत्वांगप्रधानार्थाप्रधानमात्रार्थावेतिविचार्यतत्प्रसंगेनकर्तृचिंताप्रपंचस्सर्वकर्तृविषयसमाख्याविरोधाव

63

रोधचिंतासमाप्त्यानुद्धिस्थीकृतस्य बर्हिर्लवनादेः प्राकृतकार्यमात्रसर्वार्थत्वं वैकृतकार्यसर्वार्थतापि वेति चिंतायाः संगतिं
सूचयितुमाह गतश्रुतीति । कृ समाख्यायाः सर्वैः सह विरोधः कथं वा नेति चिंतासमाप्त्यानुद्धिस्थीकृतस्यापि बर्हिर्लवनादेर्विकृ
तावतिदेशिकत्वादुपदेशचिंतार्थपक्षे चिरारासंगतिमाशंक्यातिदेशात्प्राकृतानामंगानां विकृतत्वं यावदवगमेऽपि संस्कारक
र्मणां निर्द्धाराणां विकृतत्वं यायोगाद् बर्हिरादीनां च पर्वसाधनांशे नैव द्वारस्वारूपगमादैकृताः सर्वसाधनीभूतद्वारा व्यय सप
प्रधानसामर्थ्यहेतुकातिदेशाविषयत्वेनातिदेशादनवगतेः पदार्थातिदेशद्वारामी दिष्टकृत्याद्युपदेशाधीनत्वाद्बर्हिर्लुनातीति
विकृतावतिदिष्ट्या प्रकृत्या प्राकृतस्मरणद्वारैव वैकृताः सर्वसाधने बर्हिषि द्वारस्थे लवनं विनियुज्यते बर्हिर्मात्रे चेत्तूपदेशचिंतैवेषे
तिसूचयितुं प्रकृत्यादीनां विरोधाविरोधाविरोधचिंतायाः प्रकृतौ विकृतौ चोपयोगसाम्यमाह सर्वस्येति । एवमपि प्राकृतानामंगप्रधा
नेषु धर्मसामान्यविधयः सर्वेषां वा शेषत्वं स्यात तत्प्रयुक्तत्वादित्यत्रैवोक्तत्वादेतत्पूर्वं गतार्थमित्याशंक्योत्तरविवक्षार्थत्वं तावद्द्रा
प्योक्तं विहृणोतियावदिति । एवमुत्तराधिकरणस्य पूर्वपक्षोक्तार्थत्वेनैतत्सूत्रं व्याचष्टे शंकतेति ॥ निर्देशात्तु विकृतावपूर्वस्यानधि राम
कारः । धर्मसाधारण्ये शास्त्रातिदेशयोः सप्तमदशमाद्यनिराकरिष्यमाणत्वेनेह तदाशयः पूर्वपक्षायोगादाउमानिकेत्यः ६३

प्राकृतेभ्यो ऽंगेभ्यः। प्राकृत्यस्त्वावाद्वैकृताङ्गप्राप्तेर्बहिर्लुनातीत्यतिदिष्टयाकृत्या प्राकृतवैकृतवर्हिरुद्देशेन लवनविधानात् त
दर्थं वर्हिपदस्य विवाक्षोपकारस्याकांक्षा। प्रथमं प्राकृतैः सह संबंधात्तेसमीपस्थं विकाराः प्रोञ्चयतीदितमितिन्यायेनानुमानि
कत्वेपि क्लृप्तोपकारत्वात्प्राकृतसंस्कारविधावपूर्वस्यानुद्देश्यत्वइत्येवमर्थेन सूत्रेण निराकृते प्रकृतो येविहिता धर्मास्ते विकृतौ स्युर्वाक्य
गतचोदनादिसादृश्यनिमित्तेनातिदेशेन वाक्यान्तरविहितेभ्योंगेभ्यः प्रागेव निर्दिष्टत्वात्तो यत्र प्राकृतकार्ययोराज्यवर्हिषोश्चिन्तनं प्र
धानोपकारित्वेन क्लृप्तास्तत्रैव निर्दिष्टाइत्येवमर्थेन निर्दिष्टाइतिलाघवेन सूत्रेणोनिष्ठान्तनिर्दिष्टपदात्त्वन्यानः शब्दाध्याहारेणवविहि
तेप्राकृतानाभानुभानि कुर्वाद्वैकृते स्यात्तत्त्वात्तत्स्य। प्रागनुयायोगमाशंक्योपकारातिदेशानपेक्षा प्राकृतांगातिदेशेनेषां प्र
कृतानुपकारित्वे क्लृप्तेपि विकृतानुपकारित्वस्यानन्क्लृप्तत्वेनोपदेशसाधारण्येवाक्वचिदनुपकारित्वस्यान्क्लृप्तत्वेनान्क्लृप्तोपकारत्वा
विशेषात्प्रागनयोनध्यवसेयेन द्वयस्यापि तु दशमसप्तमाद्या निराकरिष्यमाणत्वेनोपकारस्य स्थलात्वेनेवांगातिदेशात्प्राकृतंगेो
पकारविकृतावतिदिष्टप्रतिसाधनत्वस्य प्रकृतौ क्लृप्तस्योपकारैक्येन विकृतावथनुपायात्प्रकृतौ क्लृप्तोपकारत्वेन प्राकृता
नामंगानां प्रागनयोपपादनार्थं येचेत्यादिलाघवं समुदायार्थतात्पर्यन्त्वावधाव ध्येयमिति। सप्तमाद्येसाधारण्यनिराकरणेना र्घ

इति २

तिदेशइष्टः सप्तदशमाद्ये कार्यंपरः सरंइष्टइत्यर्थः ॥ धर्मातिदेशस्य करणोपकाराख्यधर्मकार्यातिदेशत्वकिंवं विहितत्वेन सर्वार्थत्व

निरासमुपपादयति। तद्धेति। यागंगतो यागसहकारी सत्फलाः पूर्वोपनैव्या प्रियन्तेक्रत्वस्याया यागगतव्यापारोक्त्या करणोपका

रात्वं कार्यमेवोक्तं ॥ प्रयोजनोक्त्या प्रात्याम्मिकपदार्थविधिप्रयोजनवादवांतरकार्याण्येकानीति हृष्टानां तंडलानां मुपायांतरे

णापि सिद्धेस्सद्वारा कार्यस्यावह्यातारख्यधर्मग्राहकत्वा योगाकार्येणग्रहणानर्थक्यशंकानिरासार्थं नियमजन्याहृष्टद्वारतो

क्ता ॥ यथावत्स्मरणादीनामपि प्रयोजनानां करणोपकारसाधनत्वात्तेनात्मसिद्धेर्ग्रहणापत्तेस्तादर्थ्येनापि बर्हिर्लवनादि

65 पदार्थप्राप्त्यापत्तिमाशंक्य तेषां करणोपकारजनकत्वेऽप्यतिदेशकाले नूवगमाद्ग्रहणाशक्तेर्यावंति वेदिस्मरणादीनि प्र

योजनानि प्रकृतौ जातानि तावंत्येव प्राप्नुवंतीत्युक्तं तैश्च ज्ञानपरिमाणैरेव पदार्थप्रयोजनैरात्मसिद्धेः पदार्थानां प्रा

प्यमाणत्वे नात्मजनकानामेव प्राप्यमाणत्वात्सर्वार्थत्वापत्तिरिति ग्रंथशेषेणोक्तं ॥ तार्थ्यार्थस्य सन्त्राद्वचनात् ६४

योक्तेर्थे सूत्रं योजयति। तस्मादिति ॥ एतदेव वाक्यमवयवशो व्याचिख्यासुः प्रधानं हीत्यनेन शास्त्रातिदेशमपि ६५

देत्यनेन चोपदेशसाधारण्यं निरस्यतीत्याह प्रधानं हीति ॥ तार्थ्यं च चोदनासामान्यस्य प्रधानगतत्वेतद्गतस्य ॥

फलसाधनयोग्यतारूपांगजन्योपकारस्यैवतेनोपस्थापयितुंशक्यत्वाद्धर्माणांतुसाक्षाच्चोदनासामान्यात्प्राप्तत्वात्प्रधानचोदना
सामान्येनवात्यंतत्तिद्वानांधर्माणांतूपस्थापयितुमशक्यत्वाच्चोदनासामान्यहेतुकश्चोदकोयस्मात्प्रधानोपकारमेवातिदेश्य
तयापेक्षतेनधर्मांस्तस्मात्प्रधानोपकारद्वारैवधर्मातिदेशोमन्तव्यस्तंत्रेणैतत्फलकेयद्धपदेशसाधारण्याश्रयेणोपकाराद्वयात्मा
धर्माणांदर्शपूर्णमासवदैन्द्राग्नादिनाथत्वयाःशंक्यतेतस्यापिविप्रकृष्टैकवाक्यत्वायोगान्नसंभवतीत्यपिचेत्यादिनोक्तमित्येवंयोज्यं॥
प्रधानाश्रितत्वेनोपकारस्याश्रयाश्रयिणोरत्यंतभेदाभावात्प्रधानादत्यंतभेदाभावंमत्वाप्रधानापेक्षोक्तोपकारापेक्षाविवक्षि
ताविशेषप्रकरणांतरेतिदेशादतिदेशमात्रपूर्वपक्षमात्रविधिशब्देनशास्त्रातिदेशस्यवक्ष्यमाणत्वाच्छास्त्रलक्षणार्थापत्त्याधर्मा
क्षिर्वातिर्दिकृतोस्मिन्मता।उपदेशसाधारण्येविप्रकृष्टत्वयशंक्यशोक्यधर्मातिदेशेइत्यादिरेकोर्थेकंचाभिनंघतियस्तूपका
रंकरोतितमेवान्यमपिप्रतीतिनियमाद्दर्शनेनधर्मैश्चाक्षिप्तएवोपकारोविकृतौकार्यइतिनियमप्रमाणाभावादुपकारविशेष
साधनत्वस्यापिकल्पनीयत्वेनकल्पनागौरवक्लेशस्यादुद्दिष्टस्योपकारातिदेशेनतत्साधनत्वस्यप्रकृतावेवक्लृप्तत्वेनाकल्पनी
यतयालाघवसंभवेगौरवप्राप्तानाश्रयणीयत्वाद्धर्मातिदेशनिरासहेतुत्वोक्तार्थनिर्ज्ञातंरवत्वपीत्यादिलाघवंचात्रवक्ष्येशास्त्रेति।य

शोपदेशसाधारण्येऽङ्गरस्था त्वयसिद्धौ ङ्गस्यैवोपस्थापनमिकेशो लिङ्गितिः। सशास्त्रातिदेशे पितेषां चोदनासामान्येनोपस्थापमाशङ्केः
स्थितएवेत्याह ङ्गरस्थेति। धर्म्मस्येत्यादिनाथं शास्त्रातिदेशोपदेशसाधारण्ययोर्द्वयोरपिनिरासार्थत्वेनव्याख्येशास्त्रेति। येव
त्यादिनायोक्तं शास्त्रातिदेशोपदेशसाधारण्यनिरासमुपसंहरतितस्मादिति। अतिदेशः सर्वोपकारस्येत्यर्थः। शास्त्रातिदेशोपदेश
66 साधारण्यनिरासस्यप्राकृतोपयोगेक्त्यर्थस्तस्मादित्यादिनाथशेषः स्पष्टत्वान्नव्याख्यातः। विरोधेत्वप्रकृतिविशेषादित्यक्तः शेषः। न
वनादेः प्राकृताप्राकृतसर्ववर्हिः कार्यार्थत्वेनिरस्तेप्रसंगात्प्राकृतसर्ववर्हिः कार्यार्थत्वस्यापिनिरासात्संगतिमिदानींशङ्के नस्व
यनपरिस्तरणीयपराजिपरिलोजनीयवर्हिषां स्थयस्वनविधानाद्धर्हिर्लुनातीतिवाक्यविहितस्यलवनस्यतादर्थ्याल्लावेपिविद्धेति
पवित्रवर्हिरर्थत्वानिरासहेत्वभावान्नदर्थतापियुक्तेतिसर्वपक्षेस्पष्टत्वादत्तस्याप्रकृतावपिविद्धेतिपवित्रार्थत्वस्यवर्हिः कार्यस्य
धुम्मविधावनधिकारइत्य [redacted] नधिकारोक्त्युपगसहितवकारश्चितौ सिद्धांतप्रतिज्ञांव्याचष्टेस्तनीमितिः। त्रिधातु
पंचधातुवाङ्नातीतियथाङ्गनस्यकृत्स्नस्यवर्हिषस्त्रिधातुपंचधातुवावेदिंस्तरणातीतिकृत्वास्तरणार्थकार्यविशेषार्थत्वावगः ६६
माद्दिष्टेतिपवित्रार्थस्यवर्हिषस्तेतोपनयनेत्रिधातुकृत्यापंचधातुकृत्यावाविरोधापत्तेरितिहेत्वर्थं विरोधेप्रकृतिविशेषादितिस्त्र

ह्वितिसाष्ये णाशंक्यलक्षणया विलंसनकीर्तनोक्त्यर्थं उच्यत इति सवतीत्यं तं साथंष्या वष्टे मादयस्वेत्यपि चेतियशेष विनियोज्य
त्वरूपपरस्य ह्वापादनासावेनतं दानस्यापि सुरस्य स्यासावाहेवतो देशेन ड्व्यत्यागमात्रं दानत्वेन विवक्षितमिति साष्ये त्यागो क्या
सूचितं। त्यक्तुत्वकीर्तने यैश्वर्य्यकीर्तनार्थत्वं कथमिति न ह्वितिसाष्ये णाशंक्य लक्षितलक्षणयैश्वर्यकीर्तनोक्त्यर्थं तदुच्यत इ
त्यादि साष्यं व्याचष्टे दात्वमपीति। केवलस्य स्वपत्नीवतो देवतात्वचोदनात्त्रयस्त्रिंशतो देवानां देवतात्वमित्यपि चेति साष्ये णोक्ते
त्वोहं सत्यं चोदनयेति साष्योक्तं देवतांतरानिषेधं न ह्विति साष्येण उसाध्यानिषेधेपि मांत्रवर्णिक देवतांतरासावस्यपरार्थे नेत्यादि
साष्येणोक्तत्वाद्देवतांतरासावोक्त्यर्थं उच्यत इति साष्यं स्पष्टत्वाद्व्याख्याय तद्धितसामर्थ्याद्देवतांतरनिषेधोक्त्यर्थमपि चेति साष्यं प
त्नीवत्वस्य गुणस्य गुणपेक्षायां मंत्रवर्णदर्शनेत्रयस्त्रिंशतो देवानां समुच्चयेन गुणित्वावगतेः पत्नीवदग्निः त्रयस्त्रिंशद्देवरूपस्य प्रकृत्य
र्थस्याख्यानपेक्षस्यैव तद्धितेन देवतात्वाभिधानमभिप्रेत्य न वक्ष्यमाणं तरग्याख्यास्यामिति वार्तिकेन सापेक्षत्वदोषस्य परिहृतत्वा
दयुक्तमाशंक्य पत्नीवाद्देवतास्येत्येकवचनांतविग्रहे त्रयस्त्रिंशतो देवानामग्रहणात्पत्नीवंतो देवता अस्येति बहुवचनांत विग्र
हेप्यैतिरस्येति मंत्रनिर्दिष्टस्याग्नेः पत्नीवच्छब्दसामानाधिकरण्याभावेन गुणित्वायोगान्मंत्रद्वय निर्दिष्टयोरग्नि गुणिनोरव्याख्यान

पेक्षसिद्धयोर्द्वयोर्गुणप्रवृत्तेरसंख्योध्यसापेक्षत्वमिमिति बहुवचनांतविग्रहेऽग्नेःपत्नीवन्नित्येकवचनांत निर्दिष्टस्याग्नेःपरामर्शा
योगाद्गुणिसमुच्चयायोगे नैकेनैव गुणिना नैराकांक्ष्यावगतेरितरस्य गुणिनो नान्वयायोगाद्देवतात्वेनान्वयमापाद्य सापेक्षतोक्तेति
परिहारस्य वचनार्थं व्याचष्टे विस्पष्टं चेति। एतच्चोदनावशेनेति साध्यं सर्वपदस्य फलं क्रमं चाथ निरासार्थत्वेन स्पष्टत्वाद्व्याख्याय पत्नीवांस्ये
त्यादि साध्यं शंकोत्तरत्वेनावतारणस्यैवं व्याचष्टे कथं पुनरिति। सामानाधिकरण्यस्यानिश्चायकत्वं शंकते नन्विति। तद्धितस्य निष्क्र
ष्य देशने विशिष्ट्योच्चारणे निःसंख्यप्रातिपदिकार्थायोगात्संख्यायां कल्प्यमानायां नियतक्रमत्वात्संख्यानामेकादिक्रमेण
वकल्प्यत्वादेकत्वकल्पनेनानुपपन्नो परिहृतायां द्वित्वबहुत्वकल्पनप्रमाणाभावादेकस्याख्यसंख्याविशेषासिद्धस्तेनैकवचनां
तनिर्दिष्टत्वादग्निरेव पत्नीवांस्यादिति तेन न शक्यत इत्येवं सामानाधिकरण्यस्यानिश्चायकत्वं समाधत्ते सत्यमिति। एतदेव विहरणानित
त्वेति। तस्मादित्यधिकरणार्थोपसंहारस्ताष्ट्यं व्याचष्टे तस्मादिति। त्रयस्त्रिंशतो देवानां पत्नीवत्ते देवतात्वादावोक्तो हव्याजेन देवतात्व
विचारे तात्पर्यं सूचितं॥ ॥वषट्कारस्य कर्तृवत्॥ ॥अत्र वषट्कारप्रयोगे स्वतन्त्रस्य समुच्चारणन्यायावगता इह क्रमसामर्थ्यात्सोमागम ६७
नुशाद्द सामर्थ्याद्वा विप्रतिपत्ति कर्मत्वावगतेरत्र वषट्कारप्रयोगे एवांगमित्यत्र वषट्कारस्य देवतार्थत्वेन क्रोमग्रहणविध्यलाबाद्द

रदेवतासंयोजनार्थवादाच्चैंद्रवायववादिशेषेणानुवषट्कारेयाज्यायाःसंकर्षेवक्ष्यमाणत्वात्सोमग्रहणकालेनुवषट्का१

हतितेनशेषेणसंयोजयतिदेवतामितिवषट्कारदेवतायैयद्धविर्वहतितच्छेषेणानुवषट्कारदेवतासुद्देश्यावषट्कारदेवतै
वंशेतिप्रयोजनार्थवषट्कारयागानंतरंनष्टेसोमेर्थकर्मत्वात्सोमांतरंगृहीत्वानुवषट्कारेयाज्याकार्याप्रतिपत्तिकर्मत्वाद्वानुष्ठि
तइतिप्रयोजनार्थवालैंगिकविनियोगविचारेतात्पर्यात्पादलक्षणसंगतीस्पष्टत्वादनुक्त्वानुवषट्कारदेवतात्वेनाभिप्रेतस्याग्नेः
सोमस्याग्नेवीहीतिमंत्रवर्णेनदेवतात्वावगमान्मंत्रविशिष्टानुवषट्कारयागचोदनयाग्नदेवतापेक्षित्वात्मांत्रवर्णिकदेवताग्रहणे
नाग्नेर्देवतात्वस्यैकांतिकत्वात्सर्वाधिकरणख्यात्यादितादेवतात्वरूपानुपलक्षणन्यायप्रसुदाहरणरूपेणास्वपक्षोत्थानादनंतर
संगतिंसूचयन्स्वपक्षमाहअनुवषट्कारेतिवायव्येंद्रवायवदेकपात्रस्यस्यापिसोमस्यानेकयागांगत्वाविरोधान्मंत्रवर्णाच्चसोमग्र
रदेवतासंयोजनार्थवादाच्चैंद्रवायववादिशेषेणानुवषट्कारेयाज्यायाःसंकर्षेवक्ष्यमाणत्वात्सोमग्रहणकालेनुवषट्का५ग्यकवा
वगमेपिप्रतिपत्तिकर्मत्वाद्वावेदकान्यदीयसोमद्रव्यकत्वानवगमादनुवषट्कारस्यागस्यार्थकर्मत्वावगतेरर्थकर्मत्वेसोमया
गांगत्वरूपप्राकृतकार्यापन्नत्वादनुवषट्कारदेवतोपलक्षणीयेत्यर्थः।वषट्कारस्थानेवंध्यात्वानकर्तव्यत्ववषट्कारशब्देनानुवषट्कार
देवतायालक्षितलक्षणयोक्तायाःप्रतिपत्तिकर्मांगत्वेनप्राकृतकार्यापत्त्यभावात्संस्कृतदेवतासंस्कारत्वस्यापलक्षणत्वाति

देशतोप्राप्तेरित्येवमुपलक्षणनिरासार्थंनैवमितिसर्वस्यत्वात्तुपक्षेतत्सर्वस्यत्वावपद्यात्तुवंगेपस्यव्याख्यायार्थमेवमित्याहत्रिरा
षद्व्याचष्टेगृह्णाति।पश्चात्तनोवर्ष्यादिःपानासर्वस्यहोत्रादेःपात्तुःप्रतिपत्तिकर्म्मपानांगत्वेनप्राप्ततद्देवताकार्यत्वापन्नस्योपल
क्षणंप्रकृतितोत्रातिदेशेनाप्राप्तत्वात्तथानकृत्वोतत्तथैतामपिप्रत्युतवषट्कारदेवतांप्रतिपत्तिकर्म्मातत्रवषट्कारस्यागांगत्वेनप्राप्तता
र्थकर्मदेवताकार्यतानापन्नत्वान्नोपलक्षयेदित्यध्याहारेणयोज्यंसर्वतरस्त्वस्यैनेवंशद्वेनवषट्कारस्योपलक्षयेदित्येतस्यशंकोपल
क्षणीयत्वपरामर्शीत्यप्रमाणवानध्याहारत्वात्प्रतिपत्तिकर्म्मांगस्त्रस्थापिविशिष्टकृतःसूक्तवाकेग्निरिदंहविरजुषतेत्युपलक्षण
वदुपलक्षणविरोधाद्धोत्रादेश्चादेवतात्वेनानुपलक्षणोपपत्तेरत्तुवषट्कारदेवतायाःप्रतिपत्तिकर्मांगत्वेप्युपलक्षणीयत्वशंका
निरासार्थंद्वेननहीतिव्याचष्टेग्राख्यार्थमप्राकृतपदमैन्द्रप्रदानाख्यकेतिस्येष्टुसत्स्वेष्टुवषट्कारदेवतोपलक्षणासावादित्येवंव्या
चष्टेनहीति।मंत्रेतुवषट्कारदेवतावायाग्निपदाम्नानात्सकृतौवोहासावादत्तुपलक्षणेपिविकृतावस्यवषट्कारस्यचाडपलक्ष
णंलक्षयिष्यतीत्याशंक्योपलक्षणास्यापगमेयदर्थकर्म्मज्योतिष्टोमास्यासात्मकंप्रकृतावैन्द्राग्न्यादेवतयाकृतंतद्विकृतावप्या
ख्ययात्तुवषट्कारदेवतयापिकार्यसिद्धेःक्रियतेसंकर्षाद्धेसोमस्याग्नेवीहीत्यत्तुयजतीत्यनेनैन्द्रवायवादियोगमंत्राख्ययणवि ६८

68

नव१

धिः सर्वपक्षयिष्या मंत्रविशिष्टकर्मांतरविधेर्वक्ष्यमाणत्वेनानुवषट्कारस्यागस्यैंद्रप्रदानवज्ज्योतिष्टोमावयवभूतायास्तत्वनिरासा
न्नादर्थ्येन वृत्तस्थ सोमग्रहणादैंद्रवायवादियागार्थत्वेन वषट्कृतस्य कर्मांतरार्थत्वायोगादतश्च हाशब्दस्य यागानुसास्वनीतेश्वदी
यद्रव्यप्रतिपत्त्यर्थावगमाद्यद्वा वसोमस्याग्नेर्वीहीत्यत्र वषट्करोतिति नैव संस्थितात्सोमाद्भक्षयतीति सोमस्य स्विष्टकृद्भाग इ
तिवद्द्रव्यप्रतिपत्त्यर्थस्विष्टकृद्यागरूपत्वसंभवादप्रतिपत्तिकर्मत्वावगमादर्थकर्मत्वे सकृदनुष्ठानापत्तेर्द्विदेवत्यादिष्वनुवषट्
कारनिषेधस्तूपलिंगादवगतस्तस्यासाहचर्यविरोधप्रसंगात्संकर्षे च स्विष्टकृद्वदनुष्ठानं सर्वपक्षयिष्याकालस्थस्वेनाग्नेः स्फुटं
वक्ष्यमाणत्वादित्येवं परिहारार्थत्वेन यज्ञनामेति साध्यं व्याख्यार्थतया प्राकृतपदमेवाहस्यानुवषट्कारदेवतायाः प्राकृतदेवताका
र्यानापन्नत्वेनोपलक्षणत्वप्रकृतितो निर्देशो नाशक्ष्येरित्येवं व्याचष्टे नचेति तस्मादित्यधिकरणार्थोपसंहारसाध्यं व्याचष्टे तस्मादिति।
॥ छंदः प्रतिषेधस्तु सर्वगामित्वात्॥ ॥ इन्द्रपीताधिकरणे सर्वपक्षप्रयोजनस्यानैंद्रसोमभक्षणानाममंत्रकत्वस्य यथादेवतं वेति सूत्रे
ण ...तिस प्रश्नसमाधानार्थत्वेनैतत्सूत्रव्याख्यार्थं स्थितादिति साध्यं व्याचष्टे स्थितादिति। इन्द्रपीताधिकरणे सर्वपक्षप्रयोजनाक्षेपात् स्थि
तादित्यर्थः॥ अहितमंत्रप्रयोगनिरासेनामंत्रकत्वसर्वपक्षप्रयोजनसमाधानार्थतयात्रशब्दव्याख्यार्थं नैतदिति साध्यं व्याचष्टे नैनेति

समाधानहेतुत्वेन समानविधानेष्वैन्द्राग्नममन्त्रत्वमित्येतत्सूत्रस्य समानविधानशब्दोक्तप्रकृतिविकारत्वाभावत्वस्मारणार्थं कि
स्मादित्यादि साध्यं व्याचष्टे उक्तमिति। ज्योतिष्टोमक्रियाया एकत्वेन कथं तद्भावात्मकप्रकरणभेदाभावादेकस्य कथं साधव्योपदेशाद
रिति त्वेनिराकांक्षत्वे नातिदेशिकधर्म्मग्राहित्वरूपविकृतित्वायोगादप्रकृतित्वे ग्राह्ये धर्मदानाशंक्य धर्म्मदातृत्वरूपप्रकृतित्वायो
गादात्मानमेव प्रकृतिविकृतितानयुक्तेत्यर्थः। तद्वदः प्रतिषेधो क्रियाख्यार्थं यद्दिंगमित्यादि साध्यमसंबद्धं यथा यापनेरुक्तं यथा
रथ्ये यथ्वा उपेत्य ताव ज्योतिष्टोमस्यालेदात्प्रकृतिविकृतित्वायोगेपि प्रदानानां प्रकृतिविकृतित्वं न विघ्नतीत्याशंकानिरासार्थं
मुच्यते ऐन्द्रः सोम इत्यादि पूर्वपक्षप्रयोजनात्तेपक्षस्य सार्थोक्तं प्रदानानां प्रकृतिविकृतित्वं य तत्क्वामिति साध्ये गर्भे साध्य स्वर्ग
कामो यजेतेति यागस्यैव फलावृद्यक्तेर्द्धर्म्मग्रहणशक्तत्वेन स्यासानां निष्फलत्वादशक्यत्वगतेस्तद्दिष्ट्यासानां धर्म्मवत्त्वासा
वात्प्रकृतिविकृतित्वायोगात्कथं नैतदिति साध्यं य एते त्यास विशेषा ऐन्द्राग्नैन्द्राश्विनात्तैनेयागाः येन फलवत्तया धर्म्मग्राहि
त्वात्प्रकृतिविकृतित्वार्हाः सुः यदि वा धर्म्मकाङ्क्षापि सिन्नयागाद्वयिनः सुक्षतः प्रकृतिविकृतित्वं तयागद्वाराप्यत्यासानां प्रकृति
विकृतित्वाद्व शंक्येत नत्वेतदप्येकयागाद्वयिन्त्वादित्येवं व्याख्यातमाहयदिहीति। नवेति साध्यं गुणानां च परार्थत्वाद संबंधः स

मव्वात्स्यादित्यनेनापि त्न्यायेनास्यासानां यागगुणत्वाद्गुणत्वपक्षमविद्यानहङ्गीकृत्यर्थत्त्रियासासमानं गुणानामपि सत्र्याजाद्दी
नां गुणत्वयात्स्फृगमात्सान्नात्फलवद्वासावेपि चात्यासानो फलवद्यागोपकारित्वेन परंपरया फलवद्ध्न्मैत्रावरुणाद्यस्यासा
नांग्रयणादिधर्म्मग्राहित्ववत्सर्वेपि देशिकातिदेशिकधर्म्मग्राहित्वोपपत्तेः प्रकृतिविकृतित्वसंसवादत्तु क्रमाशंक्यास्यासा
र्थधर्म्मविधिस्त्रावाशयत्वेनद्यारपेक्षनवेति। यागधर्म्मविधेस्त्यासमहारायागोपकारित्वाद्दैंद्रदानमात्रद्वारापि च यागोपका
रित्वोपपत्तेः १ उदानानां सेदात्सोमफलवमसयोरिवकर्म्मैक्येपि प्रकृतिविकृतित्वोपपत्तिशंकानिरासार्थत्वेनसर्वगामित्वा
शितिरत्त्रावयवस्य सर्वास्यासगामित्वासोमस्यतद्धर्माणां वेत्येवंव्यारव्यार्थंतेनेतिराष्ठंव्यावशेषयेन विनितिराघ्यान्त्वार्थेपिपाद
नायास्यासानां धर्म्मग्रहणकारणस्यायागावयवस्य सर्वास्यासगामित्वादिति व्यारव्यांतरमथनेनसूचितं। यथावृसवनानरं
वर्त्तिनां ग्रहाणां प्रातःसवनिकैः सह समानविधत्वं सक्षमपादाधिकरणे वक्ष्यते तथा नैन्द्राणामैन्द्रैः सहेति दार्ष्टान्तिकं दृष्टांतमाश्रय
थेति। कथं पुनर्ज्ञायत इत्यादि सूर्वपक्षप्रयोजनाक्षेपलाघ्योक्तं मंत्रवर्णात्सोमस्य धर्माणां चेन्द्रप्रदानविषयत्वं यद्वितिलाघ्येणाउ
लाघ्यपरिहारार्थमिन्द्रस्येत्यादिलाघ्यनात्पर्यंतमावद्यावषेनवेति। सोमेनयजेतेति प्रत्यक्षस्कृत्या सर्वप्रदानविषयत्वबोधाद्

णाउरोधेनसंकोचोनयुक्तइत्यर्थः।सवतिहिसाधनवशेनसाध्यस्यनियमइत्यादिसर्वपदप्रयोजनान्तेपवार्त्तिकोक्तमाहवनीया
दिवशेनाग्निहोत्रादेर्ब्रवर्णिकविषयतयासंकोचवन्मंत्रवशेनसोमस्यैंद्रप्रदानविषयतयासंकोचसंभवंवैषम्योक्त्यापरिहरतिन
त्वयथेति।आहवनीयस्यानारभ्यवादेनसर्वहोमार्थत्वात्संकोचकत्वंयुक्तंमंत्रस्यतुसर्वसोमार्थत्वानवगमान्नसंकोचकतायुक्तेत्य
र्थः।मंत्रस्यवाक्यात्सर्वार्थत्वानवगमेपिप्रकरणात्सर्वार्थत्वंसंभविष्यतीत्याशंक्यनिरस्यन्नैंद्रमदेवतार्थत्वंस्पष्टयतिव्याचष्टेप्रकरणइति
70 सामर्थ्यावगतैंद्रार्थसोमप्रकाशकत्वमात्रेणापिप्रकरणपाठोपपत्तेर्नसर्वसोमार्थत्वेप्रमाणमस्तीत्याशयः।अस्तिचवकालीनसो
मग्रहणविषयत्वान्मंत्रस्यतत्त्वविवेकाभावेनैंद्रसोममात्रविषयत्वायोगादैंद्रसंबंधिनःसोमस्यग्रहणंमंत्रेणस्मार्यतेदेवतांत
रसंबंधिनोध्यानादिनेत्येतद्व्याख्यानपरितोषेणतद्देवतार्थंकर्मार्थत्वात्ग्रहणशब्दोक्त्योयात्य्यःसर्वःसोमोमंत्रेणैंद्रसंबंधि
तयासंकल्पनीयोदेवतांतरसंबंधितयाध्यानादिनेत्येवंव्याख्यानमाहअथवेति।यथेंद्रागच्छेतिसुब्रह्मण्योरव्येमंत्रेप्रकृतमा
त्रोपलक्षणार्थत्वंस्वयतयेंद्रःप्रकाश्यतइत्येकादशेसुब्रह्मण्याधिकरणेवक्ष्यतेप्रदर्शनार्थत्वकल्पनायोमादेतथेहापिसूचिष्य ७०
तीतिस्वयंपरिहारांतरमाहअथवासुब्रह्मण्यावदिति।देवताशब्दपर्यायेणाक्तशब्देनदेवतांतरप्रकाशनसंभवेप्रदर्शनार्थत्वक

त्वनायोगादेतत्परिहारापरितोषेणान्यथा परिहरति। अथवा विधीति। तु शब्दोक्तो हितमंत्रप्रयोगनिरासहेतुं सर्वगामित्वा
दिति। सूत्रावयवोक्तमुपसंहरति। तस्मादिति। उपहितं छंदः प्रतिषेधशब्दव्याख्यार्थं यल्लिंगमिति। साधर्म्यं व्याचष्टे। यद्वेति। समानवि
धानत्वेपि सिद्धांतव्याख्यायेनाह। हितमंत्रप्रयोगाज्जगच्छंदः शब्दप्रयोगेषा सेनुष्टुप्छंदः शब्दविशिष्टो हविर्धानत्वेनानुष्टुप्छंदो विना
मासि धानमुपपद्यत इत्यर्थः। संस्थासामानविधानाशयेन तु लिंगोक्तिः संस्थाधिकरणवन्न्यमाणेन संस्थानां विकारत्वेन नि
राकार्येत्याह। अथ वेति। सर्वपक्षप्रयोजनसमाधानोपसंहारार्थं तस्मादिति। साधर्म्यं सोमस्य प्रत्यक्षश्रुत्या सर्वासां सविषयत्वं दक्षि
णस्य सर्वसोमविषयत्वानवबोधान्मंत्रवशेनैंद्रसोमविषयतया लक्षसंकोचापत्तेर्मंत्रासावेन लक्षणासावादयुक्तमित्याश
कां निरस्य व्याचष्टे। तस्मादिति। सामर्थ्यादवगतेंद्रसोमलक्षणार्थत्वमाचेण प्रकरणपाठोपपत्तेः सर्वसोमलक्षणार्थत्वे प्रमाणा
सावान्मंत्रवशेन मानग्रहणयोरिवलक्षस्यापि संकोचो न युक्त इत्याशयः॥ ॥ऐंद्राग्ने तु लिंगसावात्स्यात्॥ ॥समानविधानत्वोप
पादनेनोहितमंत्रप्रयोगायोगात्सर्वपक्षप्रयोजनाक्षेपपरिहृतेन्यसहितेंद्रदेवत्यसोमलक्षणेऽहितमंत्रप्रयोगोपपत्तेरमंत्रकत्वे
सर्वपक्षप्रयोजनसर्वानैंद्राव्यापकत्वेनाद्विषयव्यापकत्वोक्त्यर्थमेतदधिकरणमितिसूचनायैवं सर्वपक्षप्रयोजनसमाधानेस्थि

तेनाथाग्निष्टसमाधातुं चिंत्यत इत्यभिधानार्थस्यैवमिति नाष्ट्याख्यार्थशब्देन व्याख्यातं स्वयमसंदेहसाध्यं स्वरूपितद्वयति ज्ञात्वा साध्यं
वसंनिष्टव्याचष्टे। अथेति। ख्येन्द्रशब्दो नेन्द्रांतराणाम मंत्रकत्वे थैं ड्राग्ने नैंद्रे पि मंत्रसंज्ञावात्स्ययोजनस्य व्याख्यापकत्वेनान्यथात्वेपसू
चनार्थः। इंद्रपीतशब्दस्येंद्रदेवत्यशोकार्थवादैंद्राग्नस्यैंद्रदेवत्यतायास्तुतद्वीकरणाधिकरणेनिरस्तत्वात्कुतोयसहितेंद्रदेवत्ये
सोमद्व्यपदेशइति। पूर्वोत्तरत्वेन लिंगात्सावादितिश्चावयवव्याख्यार्थं यस्यहीत्यादिपीतमवयवांतरमिंद्रेणेत्यंतं साध्यं व्याच
ष्टाणोयस्येंद्राग्नीदेवतानंतस्येंद्रोदेवतेति क्वेंद्रपीतोक्त्यादेवताद्वा तत्क्रोराग्नेयोक्तात्वत्यतेत्येवमाद्यैतावद्व्याख्यायवंव्याचष्टे कु
71 तश्चेति। इंद्रेहपीतशब्देसापेक्षत्वेसत्यसामर्थ्याद्यदाग्नेयसामग्रीयतेतदिंद्रस्यदेवतावाकीर्तनान्नेष्यतइत्यर्थः। वैषम्यं विहायैवं
ह्यक्तइतिसाध्यावयवंव्याचष्टे। आग्नेयेहीति। केवलेंद्रदेवत्येपिपठितशेषस्यमुख्यैंद्रदेवत्यत्वाभावेनौपचारिकस्यकीर्त्यवापत्तेः
श्रौतसोवेंद्रपीतत्वस्यमंत्रार्थवादावगतस्योपचाराकीर्तनसंसर्वेलाग्नेयिकदेवताकीर्तनायोगात्यानारव्याख्यापारोविशेष
णंतस्यैवेंद्राग्निदेवत्येपठतोकंसंकल्प्यमानत्वलक्षणदेवतावाभावेपिकेनचिद्गुणविशिष्टरूपेणांशेनविषयत्वतेनमंत्रार्थवादा
वगतस्योपचारिकस्यक्रियमाणत्वाननापेक्षत्वापत्तेरित्याशयः। सोत्रलिंगोक्तिव्याख्यायांविशेषणोक्तिः। ज्ञातविषयत्वात्पीत ७१

व्यपदेशस्य केवलेष्टदेवत्येऽपि अनन्तशेषस्येष्टपीतत्वं नास्तीत्याशंकानिरासार्थं यस्य हीत्यवयवान्तरमसंबद्धव्याख्यापनेरुक्त
च्छेद्या स्थेयत्वादुपेत्य तावदुक्तात्त्वां पेये कथमेकस्य पातृत्वमित्याशंकानिरासार्थं तच्छेतिला थावयवव्याचष्टे यस्य चेति। अनेक
पेयेषु तेष्वेकं पेयात्वं निमित्तेन पातृत्वायारात्वेन पातृत्वव्यपदेशयोग्यतादर्शनादिष्टाग्निपीतेत्यर्थः। इष्टपीतत्वं वक्तुं शक्य
मित्यर्थः। यस्य हीत्युपेक्षितांसाधं व्याचष्टे न चेति। लक्षणकालेवर्तमानस्याऽनन्तशेषस्य देवतोद्देशेनाऽनन्तत्वात्मात्रादिष्टपीतत्वाल
वेऽपि अनन्तावयवगतमिष्टपीतत्वमनन्तस्य उपचर्येष्टपीतव्यपदेशो युक्त इत्यर्थः। केवलेष्टदेवत्येऽनन्तस्य कृत्स्नस्येष्टेन पीतत्वादनन्त
त्वेष्टपीतत्वोपचाराद्युक्तादवशिष्टे तत्पीतत्वव्यपदेशोपपत्तावपि इष्टाग्निदेवत्येऽनन्तस्यापि कृत्स्नस्येष्टेनापानादुत्तशेषे किंग
तेष्टपीतत्वोपचारत्वमित्याशंक्याह न चेति। ऊतादिगतमिष्टपीतत्वमुपचरिष्यत इत्याशयः। तस्मादित्यव्यापकत्वोपसंहार
लाक्षं व्याचष्टे तस्मादिति॥ ॥एकस्मिन्नादेवतान्तरा हि लागवत्॥ ॥ लिंगलाद्युशहोक्तस्य पातृत्वाद्विशेषणवत्वनिरासा
र्थं देवतोक्तिरिति इह त्रयदेवतान्तरोक्तिं व्याचष्टे सत्यमिति। उलस्य पीतस्याद्यइष्टेतरपीतव्यपदेशवदुक्तास्यां संकल्पितव्याथ
देवतान्तरसंकल्पव्यपदेशोपपत्तेरैन्द्राग्नेऽपीष्टस्य देवतावसद्भावाद्देवतान्तरोऽव्यययोगमाशंक्य न चेत्युक्तं। देवतान्तरस्येहपातृत्वे

क्ष्य

न लक्षणीयत्वादैंद्रायेवाग्निसहितस्यैंद्रपात्रत्वादग्निसहितस्यैवदेवतात्वंलक्षणयाव्यपदेश्यत इत्याशंक्य समासात्केवलस्येंद्रस्य
पात्रत्वप्रतीते रुद्देश्यांशाईविषयत्वान्नदेवतात्वव्याप्यहविषयतयैवलक्षणीयत्वापत्तेः उद्देश्यापादेयस्य च देवतात्वव्याप्तहविषयोद्देश्या
त्वेवर्ज्जईविषयत्वाद्योगादिंद्रपीतस्यैंद्राग्निदेवत्यत्वायोगसूचनार्थंतद्धितेनस्तुक्तं अनेनैवनावकल्पत इत्यंतं साधदेवतांतरोक्तिव्या
ख्यार्थमित्यपिद्रष्टव्यं। तदुक्तमितिभाष्ये ऐकस्मिन्निति सर्वपक्षप्रयोजनाव्यापकत्वाशंकापरिहारार्थमेष्टस्यावयवस्य केवलएवै
द्रदेवतायामेवाःस्यान्नान्यसहितइंद्र इत्येवंव्याख्यायां बहुकाश्रदृवत्सत्रोदाहरणाद्विभागस्यपक्षद्वीकरणविषयसिद्धांतसूत्रो
दाहरणाद्विभागोयथैकस्मिन्नेवाग्नौदेवतायांनान्यसहित इत्येवंविभागवदितिस्यावयवव्याख्यास्ववितेतिस्वयम्सूत्रावयव
द्वयं व्याचष्टे तस्मादिति। आहेति भाष्येण पक्षद्वीकरणाधिकरणेनपौनरुक्त्यमाशंक्यतत्परिहारार्थं उद्य न इत्यादि भाष्यं व्याचष्टे अ
नेनैवचेति। सवव्याख्यावाव्यासाध्यंतात्पर्यतःकृत्स्नव्याख्यायनाद्यसोमव्याऊतमवयवांतरंदेवतायापीयतेनचऊतेनावयवांतरे
ण देवतयापीतेनाऊतमवयवांतरंतत्पीतंसवतीत्येवमर्थंनास्येत्याद्यं भाष्यंऊतेष्ववयवेदेवतायाःपातृत्वाभावादयुक्तमाश
क्यास्यपेत्यवादमात्रत्वेनव्याचष्टे यद्यपीति। अशक्यत्वं प्रश्नस्त्वुपपादयति कथमिति। श्लोकं व्याचष्टे वमसस्योहीति। देवता ७२

याःपात्रत्वस्यनवमेनिराकरिष्यमाणत्वादाभिमुख्याद्वैदेवाइत्याद्यर्थवादालोचनयाग्नौवैदेवाइत्याद्यर्थवादालोचनया
ग्नौदेवमुखेनिक्षेप्यत्वापेयद्रव्यगमानुखनिक्षेपेयेन्द्रियवनःपात्रत्वप्रसिद्धेःपीतव्यपदेशस्यहुतविषयतावसीयतइत्या
शयः।अन्येनप्रकारेणकेवलेंद्रदेवत्यहुतशेषस्यापींद्रपीतत्वायोगात्तइंद्रपीतोक्तिरिंद्रदेवत्यत्वलक्षणार्थेत्यतिसंधाना
र्थंतेनेतिलाघवमिंद्रदेवत्यत्वव्याप्त्यापिसुरयहुतशेषेउपपन्नेरिंद्रदेवत्यस्यचसमुदायस्यैकदेशहोमेननष्टत्वादलक्ष्यतयाप्रका
शप्रत्यायोगादुपचाराद्धुतशेषस्येंद्रदेवत्यत्वव्यपदेशाभ्युपगमेपींद्रपीतत्वस्याप्युपचाराद्व्यपदेशोपपत्तेःश्रौतपिबत्यर्थत्या
गायोगादयुक्तमाशंक्योपपादयन्व्याचष्टेतस्मादिति।हुतेपिपीतव्यपदेशस्योपचारिकत्वेनाहुतेत्यंताविद्यमानपीतव्यपदेश
स्यादृष्टार्थत्वापत्तेरिंद्रदेवत्यत्वस्यतुसमुदायेमुख्यस्यैवविद्यमानस्याहुतेष्वन्यार्थमुपचारोपपत्तेरदृष्टकल्पनातश्चलक्षणाया
ज्यायसीयवाहदेवतात्वमेवलक्ष्यमाणस्यशेषस्योपलक्षणंनपीतेत्याशयः।यद्यपिहुतेसोमावयवेपरमार्थतःपीतत्वंस्यात्तथा
पिसमुदायसमुदायिनोरभेदात्समुदायधर्मस्यैंद्रायसंकल्पितत्वस्यसमुदायिष्वहुतभक्ष्यमाणशेषधर्मतायामुख्यत्वसंभवा
त्पीतेनचापीतलक्षणायामिंद्रपदस्योपपादस्यापिपिबतेर्धातोर्निष्ठाप्रत्ययस्यचानतिक्षेपेयेष्टत्वापत्तेःसंकल्पलक्षणायांचप्रातुमाव

स्यलक्षणोह्याप्यनेनाङ्गितेपि ततो प्रवृत्तिं शंकेत्याह नवेति। संकल्पस्य यजमानधर्मत्वात्संकल्पितत्वलक्षणार्थासंकल्पो
क्तिः। संकल्पितत्वस्यलक्ष्यमाणशेषधर्मताउपपादयितुमाह। एकदेशेपिहीति। पिवतेः संकल्पलक्षणार्थताउपसंहरति। अत इ
ति। निर्वपतेर्यागलक्षणार्थत्वात्सावेपि यागप्रतीतिःप्रयोजनं च मात्रेण दृष्टा तत्र। सर्वपक्षे प्रयोजनाव्यापकत्वशंकापरिहारमुप
संहरति तेनेति। चिंतायाः प्रयोजनं मंत्रार्थं तु संधेयं सर्वपक्षे देवतापीतत्वमतः संधेयं सिद्धांते देवतोद्देशेन त्यक्तत्वमिति॥ ॥ऊ
73 ह्यदेवताकं॥ ॥सर्वाधिकरणोक्तसापेक्षसमाससाधे योगापवादार्थत्वेनास्याधिकरणस्यानंतरसंगतिमाह ह्यदमिति। ऐंद्रश्चेव
ज्योतिष्टोमिकसोमभक्षणेषु मंत्रादिमंत्रस्य प्रयोक्तव्य इतीड्पीताधिकरणे सर्वपक्षप्रयोजनं सर्वोक्तं सर्वेषु ज्योतिष्टोमिकसो
मभक्षणेष्विति सिद्धांतप्रयोजनं च सिद्धांतस्तु वक्ष्यमाणं गायत्रछंदस्त्वसामर्थ्यरूपेण लिंगेनानेकछंदस्कज्योतिष्टोमाउत्क
र्षशंकयाक्षिप्याप्युत्कर्षसिद्धांतेन समाधानात्यादलक्षणसंगतिं सूचनायापि शाह। यथान्यसहितेंद्रदेवत्येकर्मणि सत्वमं
त्रो न लिंगेन विनियुज्यते तेन तथान्यसहितगायत्रछंदस्केपीत्येवं प्रयोजनाक्षेपस्य व्याचष्टे नवेति। केवलगायत्रछंदस्कः सोमया
गो नाम्नातो यिमंत्रगतगायत्रछंदस्त्वविशेषणसामर्थ्यात्कल्पयिष्यते। इहस्याति सर्वे वा गायत्रमेतदहर्भवतीति श्रुतेः केवल ७३

गायत्र्युपयुक्तेत्याशयः॥ ॥सर्वेषु वा तावदेकछंदस्त्वमिति स्वमाविप्रयोजनसमाधानार्थं विनाव्रतारयति इतीति। मंत्रव्या
विधायकत्वेनापूर्वयागकल्पकत्वाद्योगाद्बृहस्पतिसवेऽपि गायत्रत्वस्फूर्तेरविहितच्छंदोविशेष्याज्यादिविषयत्वेनापि सत्वेऽ
तरश्रुवाक्यादावतिदेशप्राप्तसप्तछंदस्कत्वादिबाधायोगाद्यसंबंधेनेतयइति षुक्रमरवीयेत्यादिनाछंदोविधानात्वके
वलगायत्रीछंदस्कत्वानुपपत्तेः एकछंदस्कसोमयागानां वा त्सर्वेषु सोमयागेषु मंत्रादिमंत्रस्यादित्येवमैंद्राग्नेत्रलिंगत्वाद्वात्स्या
दित्येतत्स्वरूपस्य सत्स्याछंदस्येकस्मिन्वा स्यादित्येवं तदनंतरसूत्रे तु षकस्य छंदस्त्वेत्याद्येपसूत्रेण बुद्धिस्थीकृतस्याज्यगेण इत्यंयो
ज्यं। ऽइंद्रपीतसमासवज्ञायत्रछंदः समासेपि संबंधिशब्दवृत्तिमित्त्वनित्यसापेक्षत्वाभावात्कथमनेकछंदसोगायत्रछंदस्त्वविशे
षणमित्याशंक्याह यत्रनामेति। संबंधिशब्दस्यापिगुर्वादेर्नित्यसापेक्षत्वव्याशिष्यादिनिरपेक्षत्वज्ञायत्रात्वहेतुकत्वात्संबंधिशब्द
स्यास्ता वेपि गायत्रछंदस्त्व विशेषणस्य छंदोतरनिरपेक्षस्यायावानित्यसापेक्षत्वाताभीत्याशयः। यदित्वत्रकेवलाभिदेवत्यो नस्या
त्तदानर्थक्यपरिहारायद्विदेवत्योपग्रहीष्यते तिलाघव्यार्थतः पाठेनोपपादनस्य वेक्षोकंव्यावष्टे। उक्तं हीति। वेदोक्तेर्वेदविहि
तकर्मलक्षणार्थत्वाद्वदेवयविहितानामपि सोमयागानां मध्ये कस्यचित्केवलगायत्रछंदस्कत्वं नास्तीत्युक्तेर्बृहस्पतिसवेगा

यत्रमेतद्दहर्सवतीतिश्रुतेः केवलगायत्रछंदस्कत्वंनविरुध्यतीत्याशंक्यतत्रापिक्वचित्साततरत्वाकारेऽवंगारथ्यसाधनांशेछंदो
तराणांमवश्यंसंविधादित्युक्तं। छंदोतराण्यात्युत्तेगायत्रस्याविशेषणत्वायोगेनसामर्थ्याभावात्समासोनस्यादित्याशंक्यगाय
त्रछंदस्त्वाद्येतिछंदःशब्दलक्षितछंदःकार्यसत्वयोरुक्त्याविशेषणत्वोपपत्तिसूचनार्थंतेनेतिभाष्यंव्याचष्टे अत इति। रथंतरस्सा
मैवास्येत्येवंविशेषणत्वविवक्षयाहदृष्टांतः रथंतरस्यवैकल्पिकत्वादिहत्यत्तेसामकार्यस्तोत्रसाधनत्वाभावापत्तेस्तद्व्यावृत्त्यैविशे
षणार्थवत्त्वाज्जायत्रस्यतुतत्रवैकल्पिकत्वेननित्यंछंदःकार्यस्तोत्रशस्त्रादिसाधनत्वात्यव्यावृत्त्यभावानापत्तेर्विशेषणानर्थक्याद्वै
षम्यमाशंक्यसंबंधिशब्दत्वाभावेपिनिरपेक्षत्वविशेषणत्वायोगस्यातोरथंतरस्सामत्वमिवेत्यतमात्रनिमित्तात्वियसाधतत्त्वात्स
मर्थ्यविधानसूचनार्थंदृष्टांतोक्तिर्नसर्वथासाम्येनाद्यावृत्त्यर्थत्वाभावेपिवास्यर्थत्वेनविशेषणार्थवत्त्वेतिसूचयितुमाह अतएव
चेति। छंदोंतराणामवश्यंसंविधाकेवलगायत्रछंदस्कत्वाभावेनोक्तव्यानिरपेक्षत्वविशेषणत्वायोगस्यातोरथंतरस्सामत्वमिवे
त्यतःपरामृष्टस्थानेनातःशब्देनपरामर्शः तस्मादितिपदस्यप्रयोजनसमाधानार्थंभाष्यंव्याचष्टे तस्मादिति। पूर्वोक्तप्रयोज
नसंसवेद्यस्यास्थितायाःप्रकृतेइयतिाधिकरणशेषत्वसिद्धेरतत्प्रयोजनसमाधानप्रयोजनतास्मादितिरुक्ता। सर्वेषांवैकमंत्राम ७४

74

तिशयिनस्य सक्तिपानत्वात्सवनाधिकारो हि ॥ ॥ मंत्रादि मंत्रो लिंगेनानैंद्रसोमसवनेषु न विनियुज्यत इति प्रकृताधिकरणपू
र्वपक्षनिरासेन सिद्धांतोक्त्यर्थमेतत्सूत्रमिति सूचनार्थं यदुक्तमित्युत्तराधिकरणसाधनसाध्यं व्याख्यातुमाह स्थितादिति । छंदःप्रतिषेधसू
त्रे ऐंद्रोह निरासात्सर्वेषां मंत्रवत्त्वे त्येवमुक्ते सिद्धांतसिद्धावथ इहितस्यानैंद्रेषु सामर्थ्याल्लिंगेन विनियोगानुपपत्ते रूहेनानै
ड्राणां मंत्रवत्त्वे त्येकदेशिनः पुनः प्रत्यवस्थानशंकोद्धारायैकशब्देनैकरूपत्ववाचिनो हो निरस्त इत्येवमेकमंत्रशब्दव्याख्या
र्थं सर्वेषामित्यादि सार्थं व्याचष्टे आनैंद्रेति । लिंगेनानैंद्रेष्वपि मंत्रो विनियुज्यते तेन तत्र तेष्वपि मंत्रः प्रयोक्तव्य इति सिद्धांतस्य संयोज
नं वर्त्तेणोक्तं । तत्र उपवल्लीयस्य नैंद्रपीतपाहस्यैंद्रसोमवाचितयानैंद्रेषु शक्तेः कुतो लिंगेन विनियोग इत्याशंकानिरासार्थ
त्वेन सवनाधिकारो हीति सूत्रावयवव्याख्येंद्रपीतश्लोके ऊर्ध्वीहित्वेनेंद्रपीतसवनवाचित्वादनैंद्रस्यापि सोमस्येंद्रपीतसंबंधितया
प्रकाशयितुं शक्यत्वात्तत्रापि विनियोगोपपत्तिरित्येवं व्याख्यार्थं नेंद्रपीत इत्यादि सामानाधिकरण्यादित्यंतं सार्थं व्याचष्टे अत
इति श्लोकं व्याचष्टे ऐंद्रमिति । अनेन सवनाधिकारोक्ते विषयवाचित्वादिंद्रपीतशब्दस्य सवनविषयो हीत्येवं सूत्रावयवो व्याख्यातः ॥
सातत्र्यस्य सोमस्य सवनमभिषव इति प्रातःसवनशब्दस्यापि ऊर्ध्वीहित्वेन सोमसामानाधिकरण्योपपत्तेः प्रातःसवनशब्दसा

मानाधिकरण्येपीन्द्रपीतशब्दस्यनसवनविषयत्वंस्यादित्याशंक्याहनचेति।योगरूढ्याकृत्स्नसागवाचित्वेनावगतस्यप्रातःसव
नशब्दस्यावयववृत्तत्वात्सोमवाचित्वकल्पनमानयुक्तेत्याशयः।यद्यपिवाक्यशेषाणांसोमस्यात्वर्थवितिषष्ठ्यंतसोमशब्दसामाना
धिकरण्यसिद्धेःप्रातःसवनशब्दस्यावयववृत्तत्वात्सोमवाचित्वंतथापिप्राप्त्यकृत्स्नागगतस्यकृत्स्नस्यसोमस्यप्रातरसिद्धत्वा
त्प्रातःसवनशब्दस्यकृत्स्नागगतकृत्स्नसोमवाचित्वापत्तेःसोमशब्दस्यचरूतशेषमात्रसोमवाचित्वात्प्रातःसवनसंबंधित्व
वाचित्वंशब्दं विनासामानाधिकरण्यानुपपत्तेःप्रातःसवनशब्दस्तुप्रत्ययांतःप्रसज्येतेत्याहतद्गतेति।अतोदेवसोमपक्षमिंद्रपी
तस्यप्रातःसवनस्थसंबंधीतच्छतेवयवंसह्वयामीत्येवंषष्ठीयोज्यानत्वयस्यप्रातःसवनस्यसंबंधीइंद्रपीतस्तोमस्तेत्येवमित्युपसं
हरतिश्रुतइति।षष्ठ्यंतस्यसोमशब्दस्यात्पक्षात्तावयायोगादल्पसत्त्वणोपदेशात्त्वावयवसंबंधव्यतिरेकेणानेतासोमस्येतिष
ष्ठीत्युक्तेकथमश्रुतावयवान्वयप्रतीतिरित्याशंक्यप्रतीतिसिद्धेःसोमामश्रुतावयवश्रोक्ता।किंचासर्वसंयोगाविशेषात्सुक
रणविशेषाच्चसर्वत्रविधानश्रुतसत्त्वयामिपदसामर्थ्यात्प्रासस्येवास्यमंत्रस्यशुणश्रुतेइंद्रपीतपदाशक्यासंकोचोगीकार्यःत
स्यापितुसवनविषयत्वेनशक्यकपपादनान्नसंकोचकतायुक्तेत्याहतेनेति।अग्निंद्रपीतेषपीतिशेषःअव्ययपदार्थप्रधानवत्त्व ७५

ड्डीत्यपेक्षयातत्पुरुषषष्ठ्यंपदार्थप्रधानत्वेनबलीयस्त्वात्व्यधिकरणबहुव्रीह्ययोगात्सोमविषयत्वेवेंद्रपीतो नेयुक्तेत्या
शंका निरासार्थं त्वेनसत्क्रियानत्वादितिश्रवावयवावतारणार्थंनन्वित्याशंकासाध्यंतात्पर्यतोव्याचष्टे कस्मादिति । सस्वदा
यस्येंद्रदेवत्यत्वेइंद्रपीतोक्त्याविवक्षितत्वावयवहोमेननष्टस्यसोमेतिसंबोधनार्थत्वात्स्य तत्ववचनेनतेशब्देनयद्देवमश
क्यत्वात्कुतशेषे वतक्त्यापानोक्त्यापत्तेःतत्तत्रभषायोगेनबहुव्रीहेरथंगीकार्यत्वात्कंठेकालादिवद्व्यधिकरणबहुव्रीहेरपि
संभवात्सर्वपदप्रसक्तनिष्ठत्वात्बहुव्रीहित्वावगतेर्नेद्रपीतशब्दस्यसोमविषयतायुक्तेत्येवंसक्तिपानत्वादित्यवयवव्याख्या
र्थंसत्यामित्यादिशब्दस्तंतंसाध्यंतात्पर्यतो व्याचष्टेसोमइति । सोमविषयत्वेभाक्तपानप्रसंगादिंद्रपीतोक्तेःसवनविष
यत्वंगृह्यतइत्येवंसूत्रावयवंयोजयित्वान्यएवेतिसाध्येत्वाशब्दस्यसमुदायत्वाविवक्षत्वनसर्वंपानोक्तेसक्तिवोपपादनार्थं
सर्वेत्युक्तं ।। पिबतिनासंकल्पस्यविवक्षितत्वान्मुख्यत्वाविरोधश्चसंकल्पितोक्ताश्वितः । अवयवसंकल्पशंकानिरासायैव
कारः एवतायाःपात्रत्वासावात्सवनविषयत्वेपिलाक्षतातुल्येत्याशंक्योपपद्यत्वाअप्रत्ययानांत्रयाणामपिविशिष्टार्थोक्ति
द्वारानरिषेयत्वस्याप्यादकसोमविषयत्वापेक्षयाधाउमाउस्यानारिषेयार्थत्वस्यापादिकायाःसवनविषयतायानिर्दोषत्वा

क्त्वर्थं श्रुत्यसत्वेन तु न दोषः इत्यादि तात्पर्य। सोमविषयत्वनिरासार्थं लिङ्कियानन्तरादिति इत्यादिना यद्वक्तं तत्रतश्च पक्षसिद्धौ सोमवि
षयत्वनिरासे तात्पर्यं इत्थमेव चित्तु माहनवेति। अधिकरणार्थस्तु संहरति तस्मादिति॥ ॥इति श्रीमद्विकोटमीमांसामकर
प्रतिष्ठितसोमयाजिकश्माधवात्मजमहासोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वनिबन्धकराणां न्यायसुधा
ख्यायां तृतीयस्याध्यायस्य द्वितीयः पादः॥ ॥ग्रंथशतानि ९०॥ ॥

२५०

76 ७८